NANJVADA

(Under the Project of Content Generation with a view to develop
E - Databank, E - Learning and E - Sources of Sanskrit Text.)

Chief Director

Prof. PARAMESHWARA NARAYANA SHASTRY
Vice Chancellor

Director

Prof. Ch. L. N. SARMA
Principal, Rashtriya Sanskrit Sansthan, Guruvayoor Campus

National Co-ordinator

Dr. R.G.MURALI KRISHNA
(RSKS, New Delhi)

Co-ordinator

Dr. R. BALAMURUGAN
Head, Department of Navya Nyaya, Guruvayoor Campus

Asst. Co-ordinators

Dr. N. R. SREEDHARAN
Dr. O. R. VIJAYARAGHAVAN

RASHTRIYA SANSKRIT SANSTHAN

(DEEMED UNIVERSITY)

Guruvayoor Campus, Puranattukara

नञ्वादः।।

भारतसर्वकारस्य योजना (**Content Generation with a view to develop E-Databank, E-Learning and E-Sources of Sanskrit Text.)**

प्रधाननिर्देशकः

आचार्य परमेश्वरनारायणशास्त्री

कुलपतिः

निदेशकः

आचार्य चल्ला.लक्ष्मीनारायणशर्मा

प्राचार्यः, गुरुवायूर् परिसरः

राष्ट्रियसंयोजकः

डा. रा.गायत्रीमुरलीकृष्णः

परियोजनाधिकारी

राष्ट्रिय संस्कृत संस्थानम्, नवदेहली

प्रधानसंयोजकः

डा. आर्. बालमुरुगन्

परिसरनव्यन्यायविभागाध्यक्षः, गुरुवायूर् परिसरः

उपसंयोजकौ

डा. एन्.आर्.श्रीधरन्

डा. ओ. आर्. विजयराघवन्

राष्ट्रिय संस्कृत संस्थानम्, (मानित विश्वविद्यालयः)

गुरुवायूर् परिसरः पुरनाट्टुकरा।

श्री :

।। नञ्वादः।।

राधामुखाब्जमधुमत्तमधुव्रतश्रीकृष्णस्य पादयुगलं शिरसा प्रणम्य।

नञ्वादसङ्गतशिरोमणिगूढभावं श्रीमान् गदाधरसुधीर्विशदीकरोति।।

यद्यपि सादृश्यादयः षडेव नञर्थाः। तदुक्तम् - **"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।"** इति, तथापि लक्षणयैव सादृश्यद्यर्थे प्रयोगनिर्वाहे तादृशार्थे शक्तिकल्पनमयुक्तम्, अपि तु अभावान्यत्वरूपार्थद्वय एव। सादृश्यत्वाद्यपेक्षया अभावत्वभेदत्वयोर्लघुतया तयोः प्रवृत्तिनिमित्तत्वे विनिगमकसत्त्वा-दित्याशयेनाह - **संसर्गाभाव** इति। **नञर्थः** - नञ्पदवाच्यः। संसर्गाभावेऽभावत्वनैव शक्तिः। न तु तादात्म्यातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वरूपसंसर्गाभावत्वेन। गौरवात्, तेन रूपेण बोधस्यानुभवासिद्धत्वाच्च। अत एव **तत्सादृश्यमभावश्चेति** कारिकायां संसर्गाभावस्या-भावत्वेनैवोपादानम्, न तु संसर्गाभावत्वेन।

न च संयोगादिरूपसम्बन्धावच्छिन्नप्रतियोगिताकत्वेनाभावभानानुपगमे भूतले न घट इत्यादिवाक्यजशाब्दस्य संयोगादिसम्बन्धेन भूतलादौ घटादिविशिष्टबुद्धावविरोधितापत्तिः। तत्सम्बन्धेन विशिष्टबुद्धौ तत्संसर्गावच्छिन्नप्रतियोगिताकत्वावगाहिन्या एवाभावबुद्धेः प्रतिबन्धकत्वादिति वाच्यम्। निरुक्तसंसर्गाभावत्वेन शक्तावपि तादात्म्यातिरिक्त-सम्बन्धत्वेनानुगतरूपेणैव संसर्गाभावत्वशरीरे संयोगादीनां निवेशात् नञ्पदशक्त्या विशिष्य संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकत्वालाभात् तादृशशब्दबोधस्योक्तविशिष्टबुद्धिविरोधानु-रोधेन आकाङ्क्षादिबलादेव तादृशप्रतियोगिताकत्वस्य विशिष्य प्रतियोग्यभावयोः सम्बन्धविधया भानस्योपगन्तव्यत्वात्। भूतले न घट इत्यादिवाक्यजबोधे कदाचित् संयोगावच्छिन्न-प्रतियोगिताकत्वं कदाचिच्च

समवायावच्छिन्नप्रतियोगिताकत्वं भासत इत्यत्र तत्तत्स-म्बन्धतात्पर्यमेव नियामकम्। संयोगेन घटो नास्तीत्यादौ संयोगेनेत्यादितृतीयान्तार्थः संयोगाद्यवच्छिन्नप्रतियोगिताकत्वं प्रकारतयापि भासते।

अथ संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नाभावस्य समवायावच्छिन्नघटसंयोगाभाव-समनियततया तदभिन्नत्वेन कपाले समवायेन घटो नास्तीति प्रतीत्यापत्तिः। न च तृतीयार्थोऽवच्छिन्नत्वमेव, तस्य च घटत्वावच्छिन्नप्रतियोगितायामन्वयात् नातिप्रसङ्ग इति वाच्यम्। घटत्वावच्छिन्नप्रतियोगितायाः संसर्गतया तत्र पदार्थस्य प्रकारतयाऽन्वया-सम्भवादिति चेन्न, तृतीयान्तार्थसमवायावच्छिन्नप्रतियोगिताकत्वघटपदार्थघटत्वविशिष्टयोरे-कविशिष्टेऽपरवैशिष्ट्यमिति न्यायेनाभावांशे अन्वयबोधस्वीकारेणानुपपत्तिविरहात्।

अथाभावत्वस्यान्योन्याभावसाधारणस्य प्रवृत्तिनिमित्तत्वेऽन्योन्याभावे पृथक् शक्ति-कल्पनमनर्थकम्। न चान्योन्याभावत्वप्रकारकबोधानुरोधेन तत्र शक्त्यन्तरकल्पनमावश्यकम्। अन्यथा तादात्म्यसम्बन्धेन प्रतियोगिप्रकारके अयं घट इत्यादिबोधे नायं घट इत्यादिवाक्यजबुद्धेरप्रतिबन्धकत्वापातात्। अन्योन्याभावत्वावगाहिबुद्धेरेव तथाविधबोधविरोधि-त्वात्। अन्यथा अयं घटाभाववान् इत्यादिबुद्धेरपि तादृशबोधविरोधितापातादिति वाच्यम्। अभावत्वस्य नञ्पदशक्त्या तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्य समानविभक्ति-कानुयोगिप्रतियोगिवाचकपदसमभिव्याहाररूपाकाङ्क्षाबलेन लाभात् तादात्म्यसम्बन्धा-वच्छिन्नप्रतियोगिताकाभावत्वरूपान्योन्याभावत्वलाभेन तेन रूपेण शक्तेर किञ्चित्करत्वात्। न च नास्त्येव अन्योन्याभावे पृथक् शक्तिः। संसर्गाभावान्योन्याभावयोर्द्वयोर्विशेषयोः पृथगुपादनमभावसामान्यस्य नञर्थत्वलाभाय। यथा यत्संशयव्यतिरेकनिश्चयावित्यत्र विशेषद्वयोरुपादानं व्यतिरेकज्ञानसामान्यप्रतिवन्धकतालाभाय इति वाच्यम्। पृथक्शक्तिं विना नञर्थाः षडित्यस्यासङ्गतेर्दुर्वारत्वादिति चेत्,

स्यादेवं यदि अन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वरूपं भवेत्। तदेव न, संयोग्यादितादात्म्यस्य संयोगादिरूपतया संयोगादिसम्बन्धावच्छिन्नसंयोग्यत्यन्ता-

भावस्यान्योन्याभावत्वापत्तेः। अपि तु अनुयोगिताविशेष एव। एवञ्च तादात्म्यस्यान्योन्याभावप्रतियोगितावच्छेदकत्वमप्यप्रामाणिकम्। इह संयोगेन घटो नास्तीत्यादिवत् अयं तादात्म्येन न घट इत्याद्यप्रयोगात्। एवञ्च तादृशानुयोगिताविशेषप्रकारकत्वमेवाभेदसम्बन्धेन प्रतियोगिप्रकारकधीविरोधित्वे तन्त्रम्। तथा च तेन रूपेण पृथक्शक्तिकल्पनं तत्प्रकारकबोधानुरोधेनावशयकम्।

न चाभावत्वावच्छिन्ने प्रतियोगिसम्बन्धविधया अन्योन्याभावत्वरूपविलक्षणानुयोगित्वस्य भानमेवाभेदसंसर्गकप्रतियोगिप्रकारकधीविरोधित्वे तन्त्रमास्ताम्। तथा चाभावत्वविशिष्टशक्त्यैवोपपत्तौ किं भेदे शक्त्यन्तरेणेति वाच्यम्। यतो नायं घट इत्यादौ घटत्वावच्छिन्नस्य घटत्वावच्छिन्ननिरूपितानुयोगितासम्बन्धेनाभावत्वावच्छिन्ने विशेषणतया भानम्। तस्य विपरीतज्ञानविरोधिताप्रयोजकत्वकल्पनञ्चापेक्ष्य लाघवात् अभावविशेषणतापन्नायामनुयोगितायां घटत्वावच्छिन्ननिरूपितत्वसम्बन्धेन घटत्वावच्छिन्नस्य भानम्, तस्य विपरीतधीविरोधिताप्रयोजकत्वञ्च कल्पयितुमुचितम्। अनुयोगिताया एव प्रतियोगिरूपसम्बन्धिविनिर्मोकेण प्रत्यक्षेऽभानात् अभावस्य चेदन्त्वादिनापि भानात् प्रतियोग्युपरागणैव भानमित्यनियमात्। एवञ्चाभावे धर्मिणि प्रतियोगिनः प्रकारत्वमप्रामाणिकमित्यनुयोगितांशो प्रतियोगिप्रकारकत्वमेव प्रतियोगिप्रकारकधीविरोधित्वे तन्त्रम्। तथा च भेदत्वरूपानुयोगिताविशिष्टे शक्त्यन्तरमावश्यकम्। तदन्तरेणानुयोगिताविशेषणतया प्रतियोगिनोऽन्वयासम्भवादित्याशयः।

ऋजवस्तु नञ्पदजन्यप्रातिपदिकार्थाभावान्वयबोधे सप्तमीसमभिव्याहारज्ञानं हेतुः, तज्जन्यान्योन्याभावबोधे समानविभक्तिकनामपदसमभिव्याहारज्ञानं तथेति व्युत्पत्तिभेदसूचनायैव पृथगभिधानम्, न तु शक्तिभेदः **इत्याहुः**।

नन्विह घटो न, अयं घटो नेत्यादौ घटादेरभावे प्रतियोगितयाऽन्वयेऽपि घटत्वादेः प्रतियोगितावच्छेदकत्वभानं विना तादृशावाक्यजबुद्धीनां घटत्वादिविशिष्टघटादिविशिष्टधीविरोधित्वानुपपत्तिः। इह घटपटौ न स्तः, नीलघटो नास्ति, नायं नीलघट इत्यादिबुद्धीनां घटत्वावच्छिन्नविशिष्टबुद्ध्यविरोधितया तद्विशिष्टबुद्धिविरोधितायां शुद्धघटत्वावछिन्न-

प्रतियोगितावगाहिताया: प्रयोजकत्वात्। न चाभावांशे शुद्धघटत्वावच्छिन्नप्रकारतैवोपदर्शित-बुद्धिविरोधिताप्रयोजिका, न तु तादृशप्रतियोगितावगाहितेति वाच्यम्। अभावस्य तद्रूपावच्छिन्न-वत्ताविरोधिताप्रयोजकं यत् तद्रूपावच्छिन्नप्रतियोगिताकत्वं तदवगाहितामनादृत्य तद्रूपा-वच्छिन्नप्रकारतामात्रेणाभावबुद्धे: प्रतियोगिमत्ताधीविरोधित्वासम्भवात् घटो नास्तीति ज्ञाने शुद्धघटत्वावच्छिन्नप्रतियोगित्वानवगाहनेऽपि तस्य घटसामान्यवत्ताबोधविरोधित्वे नीलघटत्वा-वच्छिन्नवत्ताबोधस्य शुद्धघटत्वावछिन्नाभावविरोधित्वात्। नीलो घटो नास्तीति ज्ञानस्य **"अधिकन्तु प्रविष्टं न तु तद्धानिरि"** ति न्यायेन तद्विरोधित्वौचित्येन तस्यास्तत्राविरोधित्वम्, न तु घटो नास्तीतिबुद्धेरिति विशेषानुपपत्ते:। एवमुक्तस्थले घटत्वादे: प्रतियोगितावच्छेदक-त्वाभाने वक्ष्यमाणातिप्रसंगो दुर्वार:। तद्भानञ्च न पदार्थविधया, उक्तवाक्ये तदुपस्थापका-भावादिति कथं तदित्याकाङ्क्षायामाकाङ्क्षादिबलात् प्रतियोग्यभावयो: सम्बन्धघटकतया तद्भानमित्याह - **तत्र चेति।**

तत्र - नञर्थे संसर्गाभावे भेदे च। **अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमिति -** येन रूपेण प्रतियोगिन: अभावांशे विशेषणता तद्धर्मपर्याप्तप्रतियोगितावच्छेदकताकत्वमित्यर्थ:। **व्युत्पत्तिबललभ्यमिति** अपदार्थोऽपि तद्रूपावच्छिन्नोपस्थापकशब्दविशेषसमभिव्याहार-रूपाकाङ्क्षाबलात् प्रतियोगिसंसर्गतया लभ्यमित्यर्थ:। घटत्वाद्यवच्छिन्नप्रतियोगिताकत्वञ्च घटत्वाद्यवच्छिन्नप्रतियोगितानिरूपितानुयोगिता। सा च घटादिरूपविशेषणप्रतियोगिकेति तत्सम्बन्धतया भासते। अनुयोगितायां दर्शितविशेषणञ्च संसर्गतावच्छेदकतया भासते। नञ्पदार्थतावच्छेदकानुयोगितायां घटादेरन्वयोपगमे तु तत्र तादृशप्रतियोगितानिरूपितत्वमेव सम्बन्ध:। घटादिनिष्ठप्रतियोगिताप्रतियोगिकं निरूप्यत्वं घटादिरूपप्रतियोगिप्रतियोगिकमपीति तस्य घटादिसम्बन्धता।

केचित्तु अभावे घटादे: सम्बन्ध: अनुयोगित्वम्। तत् सम्बन्धतया भासते। घटादिपारतन्त्र्येण च घटत्वादेरप्यभावविशेषणतया तस्य सम्बन्ध: स्वावच्छिन्नप्रतियोगि-ताकत्वम्। अनुयोगितायां घटाद्यन्वयपक्षेऽपि तस्यां घटादिपारतन्त्र्येण घटत्वादेरन्वयो बोध्य:। सर्वत्रैव च विशिष्टवैशिष्ट्यबोधे ईदृशी रीतिरनुसरणीया। एवञ्च कम्बुग्रीवादिमत्त्वादेर्गुरु-

तयाऽनवच्छेदकत्वपक्षे कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताया अप्रसिद्धावपि न क्षतिः। अवच्छिन्नप्रतियोगिताकत्वस्य कम्बुग्रीवादिमत्त्वस्य च खण्डशः प्रसिद्ध्यैव तादृशसम्बन्धेन तस्य विशेषणत्वसम्भवात्। न चान्वयितावच्छेदकावच्छिन्नत्वविशेषितप्रतियोगितायाः सम्बन्ध-प्रवेशपक्षेऽपि विशेष्यविशेषणयोः खण्डशः प्रसिद्ध्या विशेष्यविशेषणभावेन सम्बन्धता निर्वहत्येवेति वाच्यम्। एवं सति तादृशबुद्धेः भ्रमत्वासम्भवात्। तथाहि तादृशं ज्ञानं विशिष्टसम्बन्धेनाभावांशे प्रतियोगिनो न भ्रमः, विशिष्टसम्बन्धाप्रसिद्ध्या तत्सम्बन्धा-वच्छिन्नाभावस्याप्रसिद्धेः तत्संबन्धावच्छिन्नतदभाववतीत्यादेः तत्सम्बन्धघटितभ्रमत्वस्य दुर्निरूप्यत्वात्। तज्ज्ञानं प्रतियोगितांशे कम्बुग्रीवादिमत्त्वावच्छिन्नत्वस्य भ्रमः। तदवच्छिन्न-त्वस्य प्रसिद्धिश्च विषयितासम्बन्धावच्छिन्नतद्विशिष्टाभावस्य घटत्वादिविशिष्टाभावासम-नियतस्य प्रतियोगितायाम्, वृत्त्यनियामकतया विषयिताया अभावप्रतियोगितावच्छेदक-सम्बन्धताविरहेऽपि तेन सम्बन्धेन तद्विशिष्टवद्भेदप्रतियोगितावच्छेदकतायामित्यपि न। भ्रमत्वस्य प्रकारताघटितत्वेन सम्बन्धतावच्छेदकीयविषयतायां विशेषणज्ञानानपेक्षायां प्रकारतात्वासम्भवेन तदंशे भ्रमत्वासम्भवात्।

यत्तु तद्रूपावच्छिन्नप्रतियोगितावच्छेदकसम्बन्धताकतदभाववति तद्रूपेण तत्संसर्गकत-त्प्रकारकज्ञानं तद्रूपावच्छिन्नतत्सम्बन्धेन तद्भ्रमः। विशिष्टसम्बन्धाप्रसिद्धिस्थलेऽपि व्यधि-करणतद्रूपावच्छिन्नप्रतियोगितावच्छेदकसम्बन्धताकाभावप्रसिद्ध्या तादृशाभावमादाय तद्रूपा-वच्छिन्नतत्सम्बन्धेन भ्रमत्वनिर्वाहात्। कम्बुग्रीवादिमान्नास्तीत्यादिज्ञानं कम्बुग्रीवादिम-त्त्वाद्यवच्छिन्नत्वादिविशेषितप्रतियोगितासम्बन्धेन प्रतियोगिन एव भ्रमः। व्यधिकरण-धर्मावच्छिन्नप्रतियोगिताकाभावः प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्याभावधीहेतुतया तादृशकारणबाधेन तादृशप्रतीत्यसम्भव इति युक्त्या मणिकारेण खण्डितः। व्यधिकरणधर्मा-वच्छिन्नप्रतियोगितावच्छेदकसम्बन्धताकाभावखण्डनन्तु तादृशरीत्या न सम्भवति। विशिष्ट-सम्बन्धावच्छिन्नाभावबुद्धौ विशिष्टसम्बन्धज्ञानस्याहेतुत्वादिति,

तदपि न सत्, तादृशाभावस्याननुभवात्।

अथ स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रतियोगिविशेषणस्य प्रतियोगिविशेष्याभावांशे प्रकारतोपगमे पीतघटादिमति नीलघटो नास्तीत्यादिबुद्धेरनुपपत्तिः। स्वावच्छिन्नप्रतियोगिताकत्वस्य स्वपर्याप्तप्रतियोगितावच्छेदकताकत्वरूपतया नीलघटत्वाद्यवच्छिन्नाभावे घटत्वादेर्विशेषणस्य तादृशसम्बन्धविरहात्। न हि तादृशाभावप्रतियोगितावच्छेदकता घटत्वादौ पर्याप्ता, नीलत्वादेरपि तत्प्रतियोगितावच्छेदकत्वात्। घटादिसामान्याभावस्य च तादृशसम्बन्धेन घटत्वादिसम्बन्धिनः पीतघटादिमत्यसत्त्वात्। अतो नीलसहितघटत्वादिरूपप्रतियोगिविशेषणधर्मपर्याप्तप्रतियोगितावच्छेदकताकत्वं प्रतियोगिसम्बन्ध एवेत्युपेयमिति चेन्न, नीलघटो नास्तीत्यादौ नीलादिसहितस्वपर्याप्तप्रतियोगितावच्छेदकताकत्वस्य घटत्वादिसम्बन्धतोपगमेन सामञ्जस्यात्। न च स्वपदार्थस्य घटत्वादेः सम्बन्धाघटकत्वेन नीलादिसहितत्वेन घटत्वादेर्घटत्वादिसंसर्गघटकत्वासम्भवात् नीलादिसहितपर्याप्तप्रतियोगितावच्छेदकताकत्वस्य कथं घटत्वादिसम्बन्धतेति वाच्यम्। अगत्या अत्र सम्बन्धिनोऽपि सम्बन्धघटकत्वोपगमादिति **वदन्ति।**

तन्न, कम्बुग्रीवादिमान्नास्तीत्यादौ कम्बुग्रीवादिमत्त्वादौ प्रतियोगितावच्छेदकत्वपर्याप्तिभानस्यावशयकतया स्वपर्याप्तप्रतियोगितावच्छेदकताकत्वमेवाभावे तत्सम्बन्ध इत्युपेयम्। तदर्थश्च स्वभिन्नधर्मानवच्छिन्नप्रतियोगिताकत्वम्। तत्र च स्वपदार्थस्य कम्बुग्रीवादिमत्त्वादेरनिवेशो न संभवति। भिन्नत्वस्य केवलान्वयितया भिन्नधर्मानवच्छिन्नत्वाप्रसिद्धेः। तन्निवेशे च सम्बन्धाप्रसिद्धिर्दुर्वारैवेति।

वस्तुतस्तु कम्बुग्रीवादिमान्नास्तीत्यादि बुद्धौ कम्बुग्रीवादिमत्त्वाद्यवच्छिन्ननिरूपितत्वविशेषितानुयोगितायाः प्रतियोगिसम्बन्धतया भानमतेऽपि नानुपपत्तिः। यादृशसम्बन्धे यद्रूपवत्त्वयत्प्रतियोगिकत्वयद्धर्म्यनुयोगिकत्वानां त्रयाणामभावः तद्रूपविशेषिततत्सम्बन्धेन तत्प्रकारकं तद्धर्मिविशेष्यकं ज्ञानं तद्रूपावच्छिन्नतत्सम्बन्धेन तस्य तद्धर्मिणि भ्रम इति भ्रमत्वनिरुक्त्या तादृशबुद्धेः कम्बुग्रीवादिमत्त्वाद्यवच्छिन्ननिरूपितत्वविशेषितानुयोगितासम्बन्धेन प्रतियोगिभ्रमत्वोपपादनसम्भवात्। तद्धर्मावच्छिन्ननिरूपितत्वञ्च विषयित्वादौ प्रसिद्धम्। सम्बन्धधर्मिकोभयाभावघटितञ्च भ्रमत्वमवशयोपादेयम्। अन्यथा वृत्त्यनियामक-

सम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वे तत्सम्बन्धेन तस्याभाववति तेन सम्बन्धेन तत्प्रकारकत्वं भ्रमत्वमितिनिर्वचनासम्भवात्। तथा निर्वचने वृत्त्यनियामकसम्बन्धावच्छिन्नाभावाप्रसिद्ध्या तत्सम्वन्धावगाहिभ्रमासंग्रहात्। तेन सम्बन्धेन तद्वद्भेदनिवेशे व्यधिकरणसम्बन्धेन भ्रमासंग्रहात्। एवञ्च स्वसमवायिसंयोगसम्बन्धेन स्फटिकविशेष्यकलौहित्यप्रकारकप्रमायामतिव्याप्तिप्रकारोऽस्मत्कृतव्युत्पत्तिविचारेऽनुसन्धेयः। कम्बुग्रीवादिमान्नास्तीतिवाक्यस्य प्रामाण्ये तदन्यथानुपपत्या गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमावश्यकम्। अन्यथा नीलो घटो नास्तीतिवाक्यस्याप्रामाण्यं स्यात्। तत्राभेदसम्बन्धेन नीलरूपादिमतोऽन्वयितावच्छेदकतया तेन सम्बन्धेन तस्य प्रतियोगितावच्छेदकत्वस्य गौरवेणासम्भवात्। समवायादिना नीलरूपादेरवच्छेदकत्वे लाघवात्।

न चान्वयितावच्छेदकविशिष्टव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकत्वमेव सम्बन्धो वाच्य:। कम्बुग्रीवादिमत्त्वादेरभावप्रतियोगितानवच्छेदकत्वेऽपि तद्विशिष्टव्यापकतावच्छेदकघटत्वाद्यवच्छिन्नप्रतियोगिताकत्वप्रसिद्ध्या नोक्तवाक्यप्रामाण्यानुपपत्तिरिति वाच्यम्। गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे कम्बुग्रीवादिमत्त्वादिघटिततद्विशिष्टवन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वस्य गुरुतया तदवच्छिन्नाभावरूपव्यापकतावच्छेदकत्वाप्रसिद्ध्या व्यापकतावच्छेदकत्वशरीरे प्रतियोगितानां विशिष्योपादेयतया तत्तत्प्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावकूटस्य दुर्ज्ञेयतया तस्य शाब्दबोधविषयत्वासम्भवात्। प्रत्यक्षात्मकविशिष्टबुद्धौ संसर्गोपस्थितेरनपेक्षितत्वेऽपि शाब्दबोधे संसर्गतात्पर्यज्ञानस्य हेतुतया संसर्गोपस्थित्यपेक्षणात्। तथाहि घटमानयेत्यादाविदं वाक्यं कर्मत्वविशेष्यकाधेयत्वसंसर्गकघटप्रकारकप्रतीतिपरमित्याकारकस्यैव संसर्गतात्पर्यज्ञानस्य हेतुता वाच्या। तत्र चाधेयत्वं प्रकार एव, न तु संसर्ग:।

न च तत्राप्याधेयत्वं सम्बन्धतयैव विषय:। तथा चेदं वाक्यं घटवत्कर्मत्वप्रतीतिपरमित्याकारकज्ञानमेव हेतुरिति वाच्यम्। तादृशवाक्यार्थस्यापूर्वतया शाब्दबोधात्पूर्वं तज्ज्ञानस्यासम्भवात्। कथञ्चित्संभवेऽपि शब्दस्यानुवादकतापत्ते:। यदि चेदं वाक्यं घटवत्प्रतीतिपरमित्याकारकमेव संसर्गतात्पर्यज्ञानं हेतु:, प्रतीत्यंशे संसर्गविधया भासमानघटसंसर्गश्च स्वनिष्ठाधेयत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितकर्मत्वनिष्ठविशेष्यताकत्वमेवेत्याधेयत्वस्या-

प्रकारतया न तज्ज्ञानापेक्षा, न वा शब्दस्यानुवादकतेति मन्यते, तथापि तद्धर्मावच्छिन्न-प्रकारकबुद्धौ तद्धर्मांशे स्वरूपसम्बन्धरूपप्रतियोगितावच्छेदकत्वबुद्धेरेव लाघवेनानुभवबलेन च विरोधित्वात् कम्बुग्रीवादिमान्नासतीतिवाक्यजबुद्धेः कम्बुग्रीवादिमत्त्वाद्यंशे तादृशप्रतियोगिता-वच्छेदकत्वानवगाहित्वे तस्या: कम्बुग्रीवादिमत्त्वाद्यवच्छिन्नविशिष्टधीविरोधित्वानुपपत्तेश्च। अन्वयितावच्छेदकता च यत्र रूपान्तरावच्छिन्ना तत्र तद्रूपविशिष्टावच्छिन्नप्रतियोगिता-कत्वमभावे भासते। अतो घटत्वादिरूपैकजात्याद्यवच्छिन्नाभाववति पटत्वादिरूपापरजात्यादि-विशिष्टवति जातिमान्नास्तीति वाक्यमप्रमाणम्। तद्देशे जातित्वाद्युपलक्षितावच्छिन्नाभाव-सत्त्वेऽपि तद्विशिष्टावच्छिन्नाभावासत्त्वात्। तद्विशिष्टावच्छिन्नाभावश्चावच्छेदकविशेषण-धर्मान्तर्भावेण पर्याप्तप्रतियोगितावच्छेदकताक: तद्विशेषणावच्छिन्नप्रतियोगितावच्छेदकताको वाभाव:। येन सम्बन्धेन यस्यान्वयितावच्छेदकता यत्र तत्सम्बन्धावच्छिन्नमेव प्रतियोगितावच्छेदकत्वं तत्र भासते। तेन विषयितासम्बन्धेन गुणत्वावच्छिन्नप्रतियोगिता-काभाववति घटादौ गुणो नास्तीति वाक्यस्याप्रामाण्योपपत्ति:। समवायेन गुणत्वादिविशिष्टवाचकगुणादिपदात् तेनैव सम्बन्धेन तदवच्छिन्नस्यान्वयबोधात् विषयितादे: तत्रान्वयितावच्छेदकतानवच्छेदकत्वात्।

अथ घटत्वेन पटो नास्तीत्यादौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽभाव: प्रतीयत इति सौन्दलमते अन्वयितावच्छेदकस्य प्रतियोगितावच्छेदकतया भाननियमो न सम्भवति, तत्र प्रतियोगितावच्छेदकतया भासमानस्य घटत्वादेरन्वयितानवच्छेदकत्वात्।

न च तत्र तृतीयार्थो वैशिष्ट्यम्, तस्य च प्रतियोगिन्यन्वयोपगमात् घटत्वादेर-भावान्वयितावच्छेदकत्वं निराबाधमेव, तस्य प्रतियोगिविशेषणवैशिष्ट्यविशेषणत्वेऽपि वैशिष्ट्यपारतन्त्र्येण प्रतियोगिन्यपि विशेषणत्वोपगमादिति वाच्यम्। तथा सति प्रतियोगिनि बाधितधर्मस्य तदंशे प्रकारतया बोधनेन तद्वाक्यस्याप्रामाण्यापत्ते:। एवं व्यधिकरणधर्मस्य प्रतियोगिनि प्रकारतोपगमेऽप्यन्वयितावच्छेदकता न व्यधिकरणधर्ममात्रपर्याप्ता, अपितु समानाधिकरणधर्ममन्तर्भाव्यैव। तथा च समानाधिकरणधर्मस्य तत्र प्रतियोगितावच्छेदका-नन्तर्भावादन्वयितावच्छेदकतापर्याप्त्यधिकरणपर्याप्तप्रतियोगितावच्छेदकताकत्वभानासम्भव:।

न ह्यन्वयितावच्छेदकैकदेशपर्याप्तप्रतियोगितावच्छेदताकत्वमपि भासत इत्युपगमसम्भव:। तथा सति घटसामान्याभावतात्पर्येणापि नीलघटो नास्तीति प्रयोगापत्ते:। तद्धर्मांशे प्रतियोगितावच्छेदकत्वपर्याप्तिभाने तद्धर्मपर्याप्तान्वयितावच्छेदकताकबोधसामग्र्यपेक्षाया: अवश्योपेयत्वात्।

न च तावतैव कथं सामान्याभावतात्पर्येण तथा प्रयोगापत्तिवारणम्। शुद्धघटत्वादि-पर्याप्तप्रकारतावच्छेदकताकबोधोत्पादकघटो नास्तीतिवाक्यघटितसामग्र्या: अधिकन्त्वित्या-दिन्यायेन नीलघटो नास्तीति प्रयोगस्थलेऽपि सत्त्वादिति वाच्यम्। अगत्या तादृशान्वयबोधे पदार्थान्तरविशेषितस्वार्थान्वयपरत्वेनागृह्यमाणपदजन्यघटत्वावच्छिन्नोपस्थिते: शुद्धघटत्वाव-च्छिन्नप्रकारकबोधहेतुत्वमुपगम्य दर्शितस्थले तादृशबोधसामग्र्यभावस्योपपादनीयत्वात्।

न च यत्र नञर्थे तृतीयान्तेन घटत्वावच्छिन्नप्रतियोगिताकत्वं प्रकारतया न प्रत्याय्यते तत्रैवान्वयितावच्छेदके प्रतियोगितावच्छेदकत्वस्य संसर्गघटकतया भाननियम:। घटत्वेन पटो नास्तीत्यादौ घटत्वाद्यन्वयि तदवच्छिन्नप्रतियोगिताकत्वं तृतीययाऽभावप्रकारतया प्रत्याय्यते इत्यन्वयितावच्छेदकपटत्वादिकमुपलक्षणतयैव भासते। अत: समानाधिकरणधर्मस्य व्यधिकरणधर्मावच्छिन्नाभावप्रतयोगितानवच्छेदकत्वेऽपि न क्षतिरिति वाच्यम्। प्रतियोग्युप-लक्षणतयोक्तस्थलेऽन्वयितावच्छेदकभानोपगमे घटवति नीलघटत्वादिना पीतघटाद्यभावमादाय घटत्वेन घटो नास्तीतिव्यवहारस्य, स्वप्रकृत्यर्थपर्याप्तप्रतियोगितावच्छेदकताया: तृतीयार्थत्व-मुपगम्य घटत्वेनेत्यस्य घटत्वपर्याप्तप्रतियोगितावच्छेदकत्वार्थकतया नीलघटत्वावच्छिन्नाभावे तद्बाधेन वारणसम्भवेऽपि, घटत्वावच्छिन्नद्रव्यत्वोपलक्षितपटाभावमादाय घटवति घटत्वेन द्रव्यन्नास्तीतिव्यवहारस्य दुर्वारत्वात्।

न च तृतीयया समभिव्याहृताभावान्वयितावच्छेदकरूपव्यधिकरणधर्मावच्छिन्नप्रतियो-गिताकत्वमेव बोध्यत इति घटत्वस्य द्रव्यत्वाव्यधिकरणतया न तथा प्रयोग इति वाच्यम्। अवच्छेदकस्य वास्तववैयधिकरण्यविवक्षणे घटत्वद्रव्यत्वयोर्वैयधिकरण्यभ्रमदशायां घटत्वेन द्रव्यन्नास्तीतिवाक्याधीनशब्दबोधानुपपत्ते:। व्यधिकरणत्वेन ज्ञायमानत्वविवक्षणे तज्ज्ञानद-शायां घटत्वावच्छिन्नप्रतियोगिताकत्वेन पटाभावबोधकतया तद्वाक्यस्य प्रामाण्यापत्ते:। न च

तद्वाक्यस्य घटत्वे द्रव्यत्वव्यधिकरणत्वबोधकतया न प्रामाण्यप्रसंग इति वाच्यम्। तदुभयवैयधिकरण्ये पदार्थत्वस्य वाक्यार्थत्वस्य चाभावेन तद्वाक्यतो बोधासम्भवात्।

वस्तुतो न्यूनवृत्तिघटत्वावच्छिन्नद्रव्यादिसामान्याभाववति घटादिशून्यदेशे तथा व्यवहारात् वैयधिकरण्यभानमयुक्ततरम्। न च तृतीयान्तेन यत्र घटत्वावच्छिन्नप्रतियोगिता-कत्वमभावे बोध्यते तत्रान्वयितावच्छेदकव्यापकप्रतियोगिताकत्वं सम्बन्धतया भासत इत्युपेयम्। तथा च घटवति घटत्वावच्छिन्नपटाभावमादाय न तथा प्रयोगप्रसंगः। तादृशाभाव-प्रतियोगिताया द्रव्यत्वाव्यापकत्वादिति वाच्यम्। एवमपि घटवति घटत्वावच्छिन्नघटाघटोभया-भावमादाय घटत्वेन घटाघटौ न स्त इतिवत् घटत्वेन प्रमेयन्नास्तीति व्यवहारापत्तेर्दुर्वार-त्वात्। तादृशाभावप्रतियोगितायाः सकलप्रमेयवृत्तित्वात्।

अत्र वदन्ति - व्यधिकरणधर्मावच्छिन्नाभावस्य व्यधिकरणधर्मवत् प्रतियोगि-विशेषणतया भासमानः समानाधिकरणधर्मोऽपि प्रतियोगितावच्छेदकः। अत एव घटत्वेन घटपटोभयन्नास्तीत्यादिप्रतीतिविषयाभावस्य प्रतियोगिताया अव्यासज्यवृत्तित्वेऽपि व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वनिर्वाहः। घटत्वादेस्तत्प्रतियोगितासमानाधिकरणत्वेऽपि प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणस्य घटत्वादिसहितघटपटोभयत्वादेः प्रतियोगिताधिकरण-घटपटयोरपर्याप्तेरिति। यदि च पटनिष्ठप्रतियोगिताव्यधिकरणघटत्वावच्छिन्नत्वेनैव तदभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वनिर्वाहः तथापि केवलान्वयित्वानुपपत्तिः। प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टप्रतियोगिनिरूपिताधिकरणतया सममभावस्य विरोधात् घटवति भूतलादौ तादृशाभावासत्त्वप्रसङ्गात्। अस्मन्मते च व्यासज्यवृत्तितदभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणघटत्वघटपटोभयत्वयोरधिकरणा-प्रसिद्ध्या तादृशाभावविरोध्यधिकरणताया अप्यप्रसिद्ध्या तस्य केवलान्वयित्वनिर्वाहः। न चैतदनुरोधेन वह्नित्वविशिष्टाधिकरणतावति पर्वतादौ महानसीयवह्नित्वावच्छिन्नाभाव-सत्त्वानुरोधेन च प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टनिरूपिताधिकरणतयैव सममभावस्य विरोधः। तदा घटपटौ न स्त इति प्रतीतिविषयघटपटोभयत्वावच्छिन्नाभावस्यापि केवलान्वयित्वप्रसङ्गः। तथाहि - तादृशाभावस्य प्रतियोगितावच्छेदकतापर्याप्तिः नोभयत्वमात्रे

केवलघटत्वादौ वा, यत्किञ्चिदुभयवति केवलघटादिमति च तादृशाभावासत्त्वप्रसङ्गात्। नापि घटपटवृत्तित्वविशिष्टद्वित्वे, तादृशविशिष्टानुपस्थितौ तथाप्रतीत्यनुदयप्रसङ्गात्। अपि तु उभयत्वे तद्धर्मितावच्छेदकतापन्ने घटत्वे पटत्वे चेति वाच्यम्। स्वप्रतियोगितावच्छेदकतापर्याप्तिर्यादृशे तादृशपर्याप्तनिरूपकतावच्छेदकताकाधिकरणतया सममभावस्य विरोधात्। घटपटावत्रेतिप्रतीतिसाक्षिकद्वित्वतद्धर्मितावच्छेदकतापन्नघटत्वपटत्व-समुदायपर्याप्तनिरूपकतावच्छेदकताकाधिकरणतावति अत्र घटपटौ न स्त इति प्रतीतिसिद्धतादृशासमुदायपर्याप्तप्रतियोगितावच्छेदकताकाभावासत्त्वात् तादृशाभावस्य केवलान्वयित्वप्रसङ्गविरहात्।

केचित्तु तदभावप्रतियोगित्वमगत्या व्यासज्यवृत्ति स्वीक्रियते। तथा च यद्धर्मावच्छिन्ने प्रतियोगिताया: पर्याप्ति: प्रतियोगितावच्छेदकविशिष्टस्य तदवच्छिन्नस्यैव चाभावविरोधितया न समानाधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वं विना तादृशाभावस्य केवलान्वयित्वानुप-पत्तिरि**त्याहु:**।

घटत्वेन पटो नास्तीत्यादौ यद्धर्मावच्छिन्नप्रतियोगिताकत्वं तृतीयान्तेनाभावे प्रत्याय्यते तयश्च धर्म: अभावनिरूपितप्रतियोगिनिष्ठप्रकारतावच्छेदकतया भासते, तदुभयपर्याप्त-प्रतियोगितावच्छेदकताकत्वमभावांशे प्रतियोगिन: सम्बन्धतया भासत इत्युपेयते। अभावांशे धर्मान्तरावच्छिन्नप्रतियोगिताकत्वबोधकतृतीयान्तासमभिव्याहारस्थले च यादृशधर्मोऽन्वयिता-वच्छेदक: तत्पर्याप्तप्रतियोगितावच्छेदकताकत्वमेव सम्बन्ध इति न काप्यनुपपत्ति:। घटत्वेन द्रव्यन्नास्तीत्यादिबुद्धौ द्रव्यत्वादावपि प्रतियोगितावच्छेदकत्वभानात् घटत्वेन पटो नास्तीत्यादिधीविषयाभावस्य च प्रतियोगिताया द्रव्यत्वाद्यनवच्छिन्नत्वात्। अत एव घटत्वविशिष्टपटवानयमिति भ्रमे अत्र घटत्वेन पटो नास्ति, घटत्ववान् पटो नास्तीति वाक्यजबुद्ध्योरेकमेव प्रतिबन्धकत्वम्। उभयत्र घटत्वपटत्वयो: प्रतियोगितावच्छेदकत्वपर्याप्ते: संसर्गतया भानात् तदुभयावच्छिन्नप्रकारतयाऽघटितस्य तदुभयपर्याप्तप्रतियोगितावच्छेदकता-कत्वसंसर्गावगाहिबुद्धित्वरूपप्रतिबन्धकतावच्छेदकधर्मस्य तदुभयसाधारणत्वादित्यवधेयम्।

अथ घटो नास्तीत्यादिवाक्यात् घटत्वादिरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकत्व-शून्ययो: ध्वंसप्रागभावयोरन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेणाप्रत्ययात् ध्वंसप्राग-भावसाधारण्यं नञ्पदशक्तेर्न संभवतीति चेन्न ध्वंसप्रागभावयोरत्यन्ताभावविरोधितामते अन्तराश्यामे रक्तं रूपं नास्तीत्यादिव्यवहारानुरोधेन ध्वंसप्रागभावयोरपि समयविशेषावच्छेदेन सामान्यावच्छिन्नप्रतियोगिताकत्वोपगमस्यावश्यकतया तयोरपि नञा प्रतिपादनात्। व्युत्पत्ति-विरोधेन तयो: तेनाप्रतिपादनेऽपि सदातनत्वघटितात्यन्ताभावत्वापेक्षया ध्वंसादिसाधारणा-भावत्वस्य लाघवेन असदातनभावरूपाभावाभावसाधारण्यानुरोधेन च प्रवृत्तिनिमित्ततया तयोरपि नञ्पदवाच्यत्वानपायात्। न चात्यन्ताभावत्वमखण्डधर्मान्तरमनुयोगिताविशेषरूपं वा, न सदातनत्वघटितमिति न गौरवादिकमिति वाच्यम्। तादृशधर्मान्तरे मानाभावात्।

तद्व्यक्तिर्नास्तीतिवाक्यात् तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकयो: ध्वंसप्रागभावयो-र्बोधनाच्च ध्वंसप्रागभावसाधारणशक्तेरावश्यकत्वात्। न च ध्वंसप्रागभावयोरत्यन्ताभाव-विरोधस्याप्रामाणिकतया तद्व्यक्तित्वावच्छिन्नध्वंसाधिकरणे तादृशात्यन्ताभावसत्त्वात् स एवोक्तवाक्यात्प्रतीयत इति वाच्यम्। ध्वंसाधिकरणे तादृशात्यन्ताभावस्याप्रामाणिकत्वात्।

अन्वयितावच्छेदकावच्छिन्नत्वाविशेषिताया: प्रतियोगिताया नञ्पदार्थसंसर्गाभावे प्रति-योगिसंसर्गत्वोपगमे बाधकं दर्शयति - **नीलघटवती**ति। **न घट इत्याद्यव्यवहारादि**त्यनेन सम्बध्यते। तादृश्या: प्रतियोगिताया नञर्थभेदे प्रतियोगिसम्बन्धत्वे बाधकमाह - **नीलो घट** इति। **अव्यवहारादि**तिव्यवहारस्य प्रमाणत्वाभावादित्यर्थ:। शुद्धप्रतियोगितायास्सम्बन्धत्वे अबाधित-विशेषान्तराभावबोधकतया तत्तद्वाक्यानां प्रामाण्यस्य दुर्वारतया व्युत्पन्नैरपि तथा प्रयुज्येतेति भाव:। तद्रूपविशिष्टप्रतियोगिविशेषिते धर्मिणि शुद्धतद्रूपविशिष्टप्रतियोगिविशेषित-संसर्गाभावस्य, तद्रूपविशिष्टे प्रतियोगिनि शुद्धतद्रूपावच्छिन्नप्रतियोगिविशेषितभेदस्य च बोधने नञोऽसामर्थ्योपगमेन दर्शितप्रयोगवारणसम्भवेऽपि वस्तुगत्या नीलघटादिमति नीलघटादौ च अत्र न घट:, अयं न घट इत्यादिप्रयोगस्य प्रामाण्यप्रसङ्गो दुर्वार इति बोध्यम्। न च वस्तुगत्या अन्वयितावच्छेदकावच्छिन्ना या प्रतियोगिता तस्या: सम्बन्धतानियमेनाप्युक्तातिप्रसङ्ग: शक्यवारण इति

किमन्वयितावच्छेदकावच्छिन्नत्वभानोपगमेनेति वाच्यम्। लोहितवह्नि र्नास्तीत्यादौ लोहितवह्न्यादेरप्रसिद्ध्या अन्वयितावच्छेदकावच्छिन्नत्वेन वास्तवेन प्रतियोगिताव्यावर्तनासम्भवात् अन्वयितावच्छेदकावच्छिन्नत्वाभाने विपरीतज्ञाननिवर्तकत्वा-योगस्य दर्शितत्वाच्च। सामान्यतो घटमनुपादाय नीलघटत्वेन तदुपादानञ्च तदधिकरणे तत्र च विशेषान्तरात्यन्तान्योन्याभावस्याबाधितत्वप्रकाशनाय।

केचित्तु अभावाधिकरणतायामन्वयितावच्छेदकावच्छिन्नत्वभानमुपगम्यापि घटवति न घटः, घटो न घट इत्यादिप्रयोगः शक्यवारणः। पीतघटादिरूपविशेषात्यन्तान्योन्या-भावाधिकरणतायाः प्रतियोगिसंसर्गतादात्म्यवत्साधारणघटवत्त्वघटत्वाभ्यामनवच्छेदात्। अतो नीलपदोपादान**मित्याहुः।**

तन्न साधु। घटप्रतियोगिकस्य घटाकाशोभयत्वावच्छिन्नात्यन्ताभावस्य घटपटोभयत्वा-वच्छिन्नभेदस्य चाधिकरणताया अनतिप्रसक्तघटवत्त्वघटत्वाभ्यामवच्छेदसम्भवेन तादृशा-भावमादाय तथा प्रयोगस्य दुर्वारत्वात्। प्रत्येकाभावातिरिक्तव्यासज्यवृत्तिधर्मावच्छिन्ना-भावानभ्युपगमेऽपि घटप्रतियोगिकाभावत्वेनानुगताभावाधिकरणतानां घटवत्त्वादिनाऽवच्छेदे बाधकाभावात्। अन्यथा वह्न्यादिरूपवह्न्याद्यभावाभावानां प्रत्येकनिरूपिताधिकरणतानां धूमवत्त्वावच्छेद्यत्वासम्भवेन धूमवति वह्न्यभावो नास्तीत्यादिव्यवहारानुपपत्तिः।

प्रतियोगिबोधकपदोपस्थाप्यतावच्छेदकावच्छिन्नप्रतियोगिताभाननियमे बाधकमाह-**पीतघटवती**ति। **इति व्यवहाराच्चे**ति - घटपदार्थतावच्छेदकशुद्धघटत्वावच्छिन्नाभावासत्वेऽपि नीलपदसमभिव्याहारलभ्यनीलघटत्वरूपान्वयितावच्छेदकावच्छिन्नाभावमादाय तादृशव्यवहारस्य प्रमाणत्वाच्चेत्यर्थः। न केवलं नञादिपदजन्यशाब्दज्ञान एव प्रतियोगितारूपसंसर्गे प्रतियोगिता-संसर्गावच्छिन्नप्रकारतावच्छेदकतापर्याप्त्यधिकरणपर्याप्तावच्छेदकताकत्वभाननियमः, अपि तु प्रतियोगितासम्बन्धेन प्रतियोगिप्रकारकज्ञानमात्र एव। उक्तरूपानवच्छिन्नप्रतियोगित्वनिष्ठ-सांसर्गिकविषयताया अप्रामाणिकत्वादित्यवधेयम्।

न चैवं सकलसाध्याभाववन्निष्ठेत्यादिलक्षणे साध्यविशेषाभावमादायाव्याप्तेर्वारणाय साकल्यस्य साध्यविशेषणतया वर्णनविरोध इति वाच्यम्। तत्र साध्यस्याभाव: साध्याभाव इति षष्ठीतत्पुरुषजन्याभावबोधे षष्ठ्यर्थप्रतियोगिताया: प्रकारत्वात् न तु संसर्गत्वात्।

ननु नञर्थाभावस्य प्रतियोगिनेवाधिकरणेनापि समं संसर्ग: संसर्गतया भासते। नामार्थयोर्भेदेनान्वयबोध: साक्षान्नसम्भवतीति व्युत्पत्तौ निपातातिरिक्तत्वस्य नामविशेषण-त्वात्, नञश्च निपातत्वात्। अन्यथा प्रतियोगिताबोधकपदाभावात् घटो नास्तीत्यादौ नञर्थाभावे घटादिप्रतियोगिकत्वभानानुपपत्ते:। न पचति चैत्र इत्यादौ चैत्रादावभावाधारताबोधकानुयोगि-वाचकपदोत्तरविभक्त्यभावेन पाककृत्यभाववांश्चैत्र इत्यादिबोधस्य, नायं घट इत्यादाविदमा-द्यर्थे नञर्थघटभेदाद्यधिकरणताया बोधस्य चानुपपत्तेश्च। न च भिन्न एव नञोऽर्थ:, न तु स्वातन्त्र्येण भेद:। तस्य चानुयोगिन्यभेदान्वय:, न तु भेदान्वय:।

अत एवायमघट: न घट इति समासव्यासयोरविलक्षणबोधजनकत्वानुभवोऽपि। एवञ्च पर्युदासस्थले भेदवतो गुरुतया न मुख्यनञर्थता, अपि तु लक्ष्यतैव। प्रतिषेध एव च नञो मुख्यार्थ इति **शूलपाण्यादिसम्मत**मिति वाच्यम्। तथा सति संसर्गाभावोऽन्योन्याभावश्चेति विशिष्य द्वयोर्नञर्थताकथनानुपपत्ते:। एवं तादात्म्येन विशिष्टबुद्धौ विशेषणताविशेषेण भेदप्रकारकधीरेव विरोधिनी, नत्वभेदसम्वन्धेन भेदवत्प्रकारकधीरपि, गौरवात्। तथा सति नायंघट इत्यादावधिकरणे भेदस्य भेदान्वयानुपगमे तादृशवाक्यजबुद्धे: अयं घट इत्यादि-वाक्यजबोधं प्रत्यानुभाविकी विरोधिता भज्येत।

तथा च भूतलं न घट इत्यादौ भूतलादावाधारतासम्बन्धेन घटादिसंसर्गाभाव-बोधसम्भवात् अन्योन्याभावतात्पर्येणेव संसर्गाभावतात्पर्येणापि तथा प्रयोग: स्यात्। एवं भूतले न घट इत्यादौ भूतले घटसंसर्गाभावाधिकरणतावत् घटभेदाधिकरणता कुतो न प्रतीयत इत्यत आह - **प्रतियोग्यभावान्वयौ चे**ति। अधिकरण इत्यादि:। अन्वयपदं संसर्गभानपरम्। तथा चाधिकरणे यादृशपदोपस्थाप्यस्य प्रतियोगिन: प्रतियोगितावच्छेदकसम्बन्धस्य भानं यादृशमधिकरणबोधकयादृशपदसमभिव्याहारसापेक्षं तादृशपदोपस्थाप्यप्रतियोग्यन्विताभाव-स्यापि आधाराधेयभावरूपसम्बन्धस्य भानं तादृशमधिकरणबोधकतादृशपदसापेक्षञ्चेत्यर्थ:।

अनुयोगिनीति। यादृशपदोपस्थाप्य इत्यादि:। **आधाराधेयभावसम्बन्धेनान्वय** इति। आधाराधेयभावनियामकप्रतियोगितावच्छेदकसम्बन्धस्य समवायादे: संसर्गमर्यादया भानमित्यर्थ:। **तत्संसर्गाभावस्यापि तथे**ति। तत्पदोपस्थाप्यप्रतियोगिविशेषिततत्सम्बन्धा-वच्छिन्नाभावस्य आधारतासम्बन्धोऽपि तादृशपदोपस्थाप्येऽनुयोगिनि सम्बन्धमर्यादया भासत इत्यर्थ:। **तिङाद्यर्थस्ये**ति। नञोऽसत्त्व इत्यादि:। आदिपदात्सुप: परिग्रह:। **कृत्यादेरि**त्यादिना तिङर्थाश्रयत्वादिसुबर्थस्वत्वादिपरिग्रह:।

प्रथमान्तपदोपस्थाप्यत्वस्य विशेष्यत्वनियामकत्वाभिधानं तिङर्थान्वयाभिप्रायेण। चैत्रस्य धनं पश्यतीत्यादौ द्वितीयान्तपदोपस्थाप्येनापि धनादिना षष्ठ्याद्यर्थस्वत्वाद्यन्वयात् स्वार्थविशेष्यतयाऽन्वये प्रथमान्तपदोपस्थाप्यत्वस्यानियामकत्वात्। सुपश्च कारकपदोत्तरस्य योऽर्थ: तद्विशेष्यत्वे धातूपस्थाप्यत्वं नियामकम्, शेषषष्ठ्यर्थस्य विशेष्यत्वे च प्रातिपदिकोपस्थाप्यत्वं प्रत्ययान्योपस्थाप्यत्वंवा। **"गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक्स्वभेषजैरि"**त्यादौ प्रतीकारादिक्रियायामपि तदन्वयात्। उपपदविभक्तयश्च यद्यत्पदयोगे या विहिता: तदर्थविशेष्यत्वे तत्तत्पदोपस्थाप्यत्वम्। यथा चैत्रादन्य इत्यादावन्यादिपदयोगे अनुशिष्टानां पञ्चम्यादीनामर्थस्य प्रतियोगित्वादेर्विशेष्यत्वे अन्यत्वादिनिष्ठे अन्यादिपदोप-स्थाप्यत्वम्।

तत्रेति। अनुयोगिनीत्यर्थ:। **तथा** - आधाराधेयभावसम्बन्धेनान्वय इत्यर्थ:। **तदभावस्यापि** - तिङाद्युपस्थापितकृत्याद्यभावस्यापि। **तत्र तथा** - प्रथमान्तपदोपस्थाप्ये आधाराधेयभावसम्बन्धेनान्वय इत्यर्थ:। न पचति चैत्रेणेत्यादितश्चैत्रादौ नञर्थस्याभावस्य विशेषणत्वेनानन्वयात्, न चैत्रे पाककृतिरित्यत इव चैत्रे न पचतीत्यादितश्चैत्रादिवृत्तित्व-प्रकारेण पाककृत्याद्यभावाबोधाच्चेति भाव:। चैत्रस्य धनमित्यादौ षष्ठ्याद्यर्थ: स्वामित्वा-दिकम्। तच्च प्रकृत्यर्थविशेषणतया भासते। स्वामित्वादिप्रकारेण चैत्रादेरेव धनादौ स्वत्वादि-सम्बन्धेनान्वय:, विभक्त्यर्थविशष्यतापन्नप्रातिपदिकार्थस्य प्रातिपदिकार्थे साक्षादपि भेदान्वयो-पगमात्। नामार्थयोर्भेदान्वये प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वात्।

अथवा षष्ठ्याद्यर्थः स्वामित्वादिकं प्रकृत्यर्थविशेष्यतयैव भासते। धनादेस्तदनाश्रयत्वेऽपि निरूपकतासम्बन्धेन तत्र तदन्वय इति प्राचांमतं दूषयिष्यन् स्वमतमाह- **षष्ठ्यादेश्चे**ति। आदिपदात् द्वितीयादिपरिग्रहः। **चैत्रादिनिरूपितमि**ति - **स्वत्वादिकमि**त्यादिना कर्मत्वकृतिजन्यत्वादिपरिग्रहः। निरूपितत्वसम्बन्धेन चैत्रादिरूपप्रकृत्यर्थान्वयीत्यर्थः। **तन्निष्ठमि**ति - आश्रयतासम्बन्धेन विशेषणतया चैत्रान्वयि आधेयतासम्बन्धेन चैत्रादिरूपविशेषणेनान्वयि वेत्यर्थः। **स्वामित्वादी**त्यादिना कर्मत्वकर्तृत्वादिपरिग्रहः। **तस्ये**ति - चैत्रस्य चैत्रनिष्ठस्वामित्वादेश्चेत्यर्थः। **धनाद्यवृत्तित्वेने**तिवृत्त्यनियामकस्वत्वनिरूपकत्वादिसम्बन्धेन धनादिसम्बन्धित्वेऽपि धनाद्यवृत्तितयेत्यर्थः। धनादावाश्रयतासम्बन्धेन चैत्रादेस्तन्निष्ठस्वामित्वादेश्चाभावसत्वेनेति शेषः। **प्रसङ्गात्** भवन्मते अबाधिततादृशचैत्राद्यभावबोधकस्येत्यादिप्रयोगस्य प्रामाण्यप्रसङ्गात्।

ननु स्वामित्वादेः प्रकृत्यर्थविशेष्यतापक्षे स्वामित्वादेः निरूपकत्वसम्बन्धावच्छिन्नाभावस्य, प्रकृत्यर्थविशेषणतापक्षे तद्विशिष्टप्रकृत्यर्थचैत्रादेः स्वत्वादिसम्बन्धावच्छिन्नाभावस्य नञा प्रत्यायनोपगमान्नोक्तातिप्रसङ्गावकाशः। तादृशाभावस्य धनादौ बाधादित्यत आह - **निरूपकत्वादेरि**ति। आदिपदात् स्वत्वादिपरिग्रहः। **प्रतियोगितानवच्छेदकत्वादि**ति - वृत्त्यनियामकतयेत्यादिः। वृत्त्यनियामकसम्बन्धावच्छिन्नसंसर्गाभावस्याप्रामाणिकत्वात्। येन हि सम्बन्धेनायमिहेति प्रत्ययः तत्सम्बन्धमादायैव नायमिहेति प्रत्ययः। निरूपकतासम्बन्धेन धने स्वामित्वमिति प्रत्ययाभावात् तेन सम्बन्धेन नात्र स्वामित्वमिति प्रतीतेरप्यभावः।

अत एव धनमात्रे स्वामित्वमात्रस्याश्रयतासम्बन्धावच्छिन्नाभावसत्त्वेन तत्तद्देशवृत्तिवायौ नीलरूपाभाव इतिवदचैत्रीयधने न चैत्रनिष्ठं स्वामित्वमिति धनेऽचैत्रीयत्वस्य स्वामित्वे च चैत्रनिष्ठत्वस्याव्यावर्तकतया न व्यवह्रियते, अपितु धने न स्वामित्वमित्येव। अन्यथा निरूपकतासम्बन्धावच्छिन्नस्वामित्वाभावतात्पर्येण तथाप्रयोगस्य दुर्वारतापत्तेः। अत एव च कृतिमत्त्वरूपकर्तृत्वसम्बन्धस्य वृत्त्यनियामकतया न पचतीत्यत्रैतत्सम्बन्धावच्छिन्नक्रियाभावबोधासम्भवेन पचतीत्यादौ कृतिमत्त्वसम्बन्धेन पाकादेः कर्तर्यन्वयबोधं मणिकारो नोपजगाम। उपजगाम तु जानातीत्यादावाश्रयतासम्बन्धेन ज्ञानादेरिति भावः।

वृत्यनियामकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्वीकारे स्वत्वसम्बन्धावच्छिन्नचैत्राभावचैत्रस्वत्वाभावयो: समनियततयाऽभिन्नत्वेनाभावकल्पनाधिक्यविरहेऽप्यतिरिक्तप्रतियोगिताकल्पनाधिक्याद् गौरवमित्यपि बोध्यम्।

यत्र चेति - ययोरित्यर्थ:। **न संसर्गमर्यादया लभ्य** इति - भेदान्वये निराकाङ्क्षतया इत्यादि:। तादृशौ च प्रातिपदिकार्थौ, तत्रेति। तत्पदार्थे तत्पदार्थसंसर्गाभावबोधे अनुयोगिवाचकपदोत्तरं सप्तम्यपेक्षेति तत्राभावसम्बन्धस्याधारतारूपस्य संसर्गत्वासम्भवेन तदर्थकविभक्तिं विना तद्भानासम्भवादिति भाव:। अत्र भूतलघटाभावयोस्साक्षाद्भेदान्वयबोधस्याप्रसिद्ध्या तत्सामग्र्या अकल्पनात् “भूतलन्न घट” इत्यादिवाक्यान्न तादृशशाब्दबोधापत्ति:। यदि च घटाभावादिविशिष्टभूतलादिपरतदादिपदघटितात् तदस्तीतिवाक्यात् भूतलाद्यंशे घटाद्यभावप्रकारकबोध: प्रसिद्ध इत्युच्यते, तदा तादृशबोधोत्पत्तौ तादृशवाक्यज्ञानतद्घटकतदादिपदजन्यतादृशविशिष्टार्थोपस्थित्यादिघटितसामग्र्या एव प्रयोजकत्वात्तदभावादेव नोक्तस्थले तदुत्पादप्रसङ्ग:। “भूतले न घट” इत्यादौ प्रसिद्धो बोधश्च घटाद्यभावे भूतलादिवृत्तित्व प्रकारक:। तदुत्पादिका च सामग्री परस्परसमभिव्याहृतप्रथमान्तघटादिपदनञ्पदजन्यघटादितदभावोपस्थितिभ्यामिव तत्तत्पदसमभिव्याहृतसप्तमीजन्याधेयत्वोपस्थितितत्प्रकृतिजन्यभूतलोपस्थित्यादिनापि घटिता। “भूतलन्न घट” इत्यादौ तदभावादेव न तदुत्पादप्रसङ्ग:। एवं “न पचति चैत्र” इत्यादौ प्रसिद्धस्य चैत्रादिविशेष्यकपाककृत्याद्यभावप्रकारकबोधस्य सामग्री प्रथमान्तपदजन्यानुयोग्युपस्थितिविभक्तिजन्यकृत्यादिरूपप्रतियोग्युपस्थितिघटिता। तदभावात् “पाककृतिर्न चैत्र” इत्यादौ न तत्प्रसङ्ग:। एवं “पाककृतिर्न चैत्र” इत्यादिस्थलप्रसिद्धस्याभावांशे चैत्रादिवृत्तित्वप्रकारकबोधस्याप्युक्तरीत्या वारणमिति बोध्यम्।

ननु सप्तम्यन्तभूतलादिपदेन नञर्थाभावे आश्रयतासम्बन्धेन भूतलवृत्तित्वबोधेन तादृशपदेन नेदं चैत्रस्येत्यादौ षष्ठ्याद्यन्तपदेनेव प्रथमान्तार्थविशेषणनञर्थाभावेऽपि कदाचित् प्रतियोगितया स्वार्थान्वयबोधजननात् “घटाभावो भूतले”, “भूतलवृत्तित्वाभाववान् घट” इति द्विविध एव “भूतले न घट” इत्याद्याकारकवाक्यजबोध:। एवञ्च तादृशवाक्यात् कदाचित्

प्रथमो बोधः कदाचिच्च द्वितीय इत्यत्र किं नियामकमित्याकाङ्क्षायां तात्पर्यभेदस्य तन्नियामकत्वमाह - **अत्र चेति**। **अत्र** - "भूतले न घट" इत्यादिवाक्यस्थले।

ननु सर्वत्र सप्तम्यन्तार्थस्याभावनिष्ठतयैवान्वयोऽस्तु, न तु कदाचिदपि तत्प्रतियोगितया। विनिगमकञ्चाग्रे व्यक्तीभविष्यतीत्यत आह - **अत एवे**ति। कदाचित् सप्तम्यन्तार्थप्रतियोगिकाभावस्यापि नञा बोधनादेवेत्यर्थः। इत्यादौ - इत्यादि द्वित्रिवाक्ये। **प्रतीतेरेकविशेष्यकत्वानुभवः** - गन्धाद्येकविशेष्यकप्रतीतिजनकत्वानुभवः। न जले इत्यतो गन्धाभावस्यैव जलवृत्तित्वबोधोपगमे तत्प्रतीतावभावस्यैव विशेष्यतया पृथिव्यां गन्ध इत्यतश्च तद्विशेष्यकबोधानुत्पत्या तयोरेकविशेष्यकबोधजनकत्वानुभवो विरुध्येतेति भावः।

नञर्थाभावनिष्ठाधेयताबोधकत्वं सप्तम्याः खण्डयतां मतमुपन्यस्यति - **केचित्त्वि**ति। **विशेष्ये विशेषणस्याभाव** इति। नञोऽसत्त्वे यत्पदार्थे यत्पदार्थो विशेषणतया भासते तत्र नञा तत्पदार्थे तत्पदार्थाभावो विशेषणतया प्रत्याय्यत इत्यर्थः। तथा च "भूतले घट" इत्यतो घटे भूतलवृत्तित्वस्य विशेषणतया बोधात् "भूतले न घट" इत्यतोऽपि घटे भूतलवृत्तित्वाभाव एव विशेषणतया प्रतीयते, न तु "घटाभावे भूतलवृत्तित्वम्", एकाकारवाक्यस्य द्विविधबोधजनकत्वोपगमे नञ्पदे सप्तम्यन्तभूतलादिपदसमभिव्याहारज्ञानस्य द्विविधकारणत्वकल्पनापत्तेः। उभयसाधारणतत्कार्यतावच्छेदकस्यैकस्य कथञ्चित्सम्भवेऽपि तादृशवाक्यधर्मिकद्विविधवाक्यार्थतात्पर्यज्ञानस्य पृथक्कारणतया कारणताधिक्यस्य दुर्वारत्वादिति भावः। एतन्मते युक्त्यन्तरमाह - **अत एवे**ति। **घटोऽस्तीत्यादाविवे**ति। आदिना घटौ स्तः, घटास्सन्तीत्यादिपरिग्रहः। **वचनैक्यनियम** इति। विशेष्यविशेषणपदयोः समानवचनत्वनियमेन सुप्तिङोर्वचनसाम्यनियम इत्यर्थः। "भूतले घटो नास्ती"त्यादावभावस्य भूतलाद्यस्तित्वविशेष्यत्वे तदैक्येन "घटौ न स्त" इत्यादौ द्विवचनाद्यनुपपत्तेरिति भावः।

न चैतन्मतेऽपि "घटो नास्ति", "घटौ न स्त" इत्यादावाख्यातार्थस्य प्रतियोगितयाऽभावविशेषणत्वमेव, न तु घटविशेषणत्वमिति कथमाख्यातान्तस्य घटादिपदसमानवचनत्वनियम इति वाच्यम्। विशेषणपदस्य साक्षात् स्वार्थविशेष्यपदेनेव स्वार्थविशेष्यनिपातार्थविशेष्यपदेनापि समानवचनत्वनियम इत्याशयात्। न च घटौ न स्त

इत्यादावस्तित्वाभावस्य घटादौ बोधपक्षे एकघटवति घटौ न स्त इति व्यवहारो न स्यात्, घटे तद्देशास्तित्वसत्त्वे द्वित्वाद्यवच्छिन्नेऽपि तत्र तदभावासत्त्वादिति वाच्यम्। द्वित्वाद्य-वच्छेदेन प्रतियोग्यसत्त्वे प्रतियोगिमत्यपि तदवच्छिन्ने तदभाव इत्यस्य एतद्वादिनोपगमात्।

केचित्तु अत्र घटौ न स्त इत्यादौ घटद्वयत्वादिसामानाधिकरण्येनैतद्देशास्तित्वाभावः प्रतीयते। यत्र चैक एव घटः तत्र तादृशद्वित्वसामानाधिकरण्येन घटान्तरे एतद्देशवृत्तित्वाभावस्याभावादत्र घटौ न स्त इति वाक्यस्य योग्यता।

न चैवं यत्राधिकरणे घटद्वयं वर्तते तदधिकरणास्तित्वाभावस्यापि घटपर्याप्तद्वित्वा-श्रयतद्देशावृत्तिघटान्तरे सत्त्वात् तदधिकरणपरमत्र घटौ न स्त इति वाक्यं प्रमाणं स्यादिति वाच्यम्। घटपर्याप्तद्वित्वत्वावच्छेदेन नञर्थाभावसामानाधिकरण्यभानोपगमात् यत्र देशे यत्किञ्चिद्घटद्वयसत्त्वं तद्घटद्वयद्वित्वे तद्देशवृत्तित्वाभावसामानाधिकरण्यासत्त्वेन न घटपर्याप्तद्वित्वत्वावच्छेदेन तद्देशवृत्तित्वाभावसामानाधिकरण्यमिति तद्बोधकतादृशवाक्यस्य प्रामाण्याप्रसक्तेरि**त्याहुः**।

तच्चिन्त्यम्। तादृशद्वित्वे तद्देशास्तित्वाभावसामानाधिकरण्यभानं हि धर्मितावच्छेदक-तादृशद्वित्वप्रकारेण भासमाने धर्मिणि तादृशाभावरूपविशेषणसम्बन्धभानम्, न तु तादृशद्वित्वे तादृशाभावाधिकरणवृत्तित्वस्य प्रकारतया संसर्गतया वा भानम्। तत्र तथा तद्भासकाभावात्। तथा च तादृशद्वित्वत्वे तादृशाभावसामानाधिकरण्यावच्छेदकत्वस्य तत्सामानाधिकरण्ये वा तादृशद्वित्वत्वावच्छिन्नत्वस्य भानमप्रसक्तमेव। एकदेशवृत्तिधर्मस्य द्वित्वाद्यवच्छेदेन भानोपगमे त्वत्र घटौ न स्त इत्यादिवाक्यादुक्तद्वित्वत्वावच्छेदेन तद्देशास्तित्वाभावावच्छेदकत्वभानोपगमात् घटद्वयाधिकरणदेशास्तित्वाभावस्य तदधिकरणा-वृत्तिघटसाधारणद्वित्वावच्छेदेन सत्त्वेऽपि नातिप्रसङ्गः। तादृशद्वित्वत्वावच्छेदेनाभावा-वच्छेदकत्वभानञ्च अभावरूपविशेषणे धर्मितावच्छेदकतावच्छेदकतादृशद्वित्वत्वावच्छिन्ना-वच्छेदकताकत्वरूपधर्मितावच्छेदकावच्छिन्नत्वभानम्। तच्च सम्भवत्येव। अवच्छेदकावच्छेदेन विशिष्टबुद्धौ धर्मितावच्छेदकावच्छेद्यताया विशेषणे भानस्य सर्वसम्मतत्वात्।

यद्यप्युक्तयुक्त्या अत्र घटो नास्ति, अत्र घटौ न स्त इत्यादावभावेऽस्तित्वादिक्रियान्वय एव खण्डयितुं शक्यते, न त्वत्र घटो न इत्यादावभावे सप्तम्यर्थान्वयः; तथापि क्रियां विना न वाक्यसमाप्तिरिति अत्र न घट इत्यादावप्यस्तीत्यध्याहारेण तिङन्तार्थस्यैवाभावेऽन्वय इत्यभिप्रेत्यैव तदभिहितम्। अस्तीत्यस्य समभिव्याहारे चाधारसप्तम्या निरूपितत्वमर्थः। वृत्त्यर्थकधातुयोगे निरूपकस्यैवाधारत्वात्। भूतले वर्तते भूतलेऽस्तीत्यादेः समानार्थतया वृत्तिरस्त्यर्थः।

गतिश्चिन्तनीयेति। सत्ताशब्दस्य सत्तासमवाये सत्ताप्रतियोगिकत्वविशिष्टसमवायानुयोगित्वे वा लक्षणयोपपत्तिप्रकारश्चिन्तनीयः। यथाश्रुतार्थेऽनुपपत्तिं दर्शयति - **जाती**ति। **अप्रसिद्धेरि**ति। तदभावस्य सत्तायां नञा बोधयितुमशक्यत्वादिति शेषः। इदञ्चात्र समवायेन वृत्तेः सप्तम्यर्थत्वे बोध्यम्। वृत्तिसामान्यस्य सप्तम्यर्थत्वोपगमेऽप्रसिद्धिविरहेण तत्पक्षे बाधकमाह - **सम्बन्धान्तरेणे**ति। एकार्थसमवायेनेत्येर्थः। गुणकर्मान्यत्वविशिष्टसत्तात्वादिना सत्तादौ गुणादिवृत्तित्वानुपगमे गुणे न विशिष्टसत्तेत्यादावपि विशिष्टनिरूपिताधिकरणत्वे लक्षणया योग्यत्वमुपपादनीयम्।

अथ विशिष्टसत्तेति वाक्यमेव, न तु पदमिति तच्छक्याप्रसिद्ध्या लक्षणाया असम्भव इति चेत्, भावप्रत्ययान्तसत्ताशब्दस्यापि वाक्यतया जातौ न सत्तेत्यत्रापि सत्तासमवायलाभानुपपत्तिः। यदि च भावप्रत्ययस्य साधारणधर्मरूपशक्यार्थसमवायादौ लक्षणोपेयते, तदात्रापि भावप्रत्ययस्यैव विशिष्टनिरूपिताधिकरणतायां लक्षणा स्वीकरणीयेति।

मतान्तरमाह - **सप्तम्यर्थे**ति। भूतले घटो नास्ति, जातौ न सत्तास्तीत्यादौ भूतलजात्याद्यस्तित्वरूपसप्तमीसमभिव्याहृतक्रियापदपर्यन्तार्थस्याश्रयतयान्वयी योऽभावः प्रतियोगितासम्बन्धेन प्रकारीभवतस्तस्य प्रतियोगिन्यन्वय इत्यर्थः। एवञ्च परम्परया क्रियाविशेष्यप्रतियोगिवाचकघटादिपदसमानवचनत्वं क्रियापदस्य निर्वहतीति द्रष्टव्यम्। येन रूपेण प्रतियोगिनो विशेषणत्वं तद्रूपावच्छिन्नत्वविशेषितैव प्रतियोगिता सम्बन्धतया भासते। अतो घटादिमति विशिष्टाभावमादायात्र घटो नास्तीत्यादयो न व्यवहाराः। अवच्छिन्नत्वञ्च नान्यूनवृत्तित्वम्, अपि तु स्वरूपसम्बन्धविशेषः। तेन वह्न्यादिमति तार्णातार्णवह्नी न स्त

इतिवत्तादृशाभावमादाय अत्र वह्निर्नास्तीत्यादयो न व्यवहारा:, न वा गुणान्यत्वविशिष्ट-सत्तात्वाद्यवच्छिन्नाभावमादाय गुणादौ सत्ता नास्तीत्यादय:। अभावे प्रतियोगिनोऽन्वयिता-वच्छेदकाविच्छन्नप्रतियोगिताकत्वस्य संसर्गतापक्षेऽपीदृशातिप्रसङ्गस्य तथैव वारणीयत्वात्।

अत्र चाभावेऽनुयोगितासम्बन्धेन प्रतियोगिप्रकारको घटो नास्तीत्यादिरेव प्रत्यय आनुभविक:, न तु प्रतियोगिनि प्रतियोगितासम्बन्धेनाभावप्रकारकोऽभावीयो घट इत्यादि:।

अथैवं प्रतियोगिन्यभावस्य प्रतियोगिता सम्बन्ध एव न स्यादिति चेत्, का क्षति:। नञ्पदघटितवाक्यात् प्रतियोगिन्यभावप्रतियोगिताप्रकारकबोधश्च न सम्भवति, प्रतियोगिताया अपदार्थत्वात्। न च नञ्पदोत्तरविभक्तिरेव प्रतियोगित्वार्थिका, तत्कल्पने गौरवात्। प्रथमाविभक्ते: संख्यातिरिक्तार्थपरत्वेऽसाधुत्वात्। निपातोत्तरविभक्त्यन्तरानुदयात्। तदनिश्चयेऽपि शाब्दबोधस्यानुभवात्। प्रतियोग्यभावयो: सम्बन्धं सम्बन्धविधयाऽवगाहमानस्यैव ज्ञानस्य लाघवेन प्रतियोगिविशिष्टधीविरोधितया जातौ न सत्तेत्यादिवाक्याज्जातिधर्मिकसत्ता-संशयादिनिवर्तकज्ञानानिर्वाहश्चे**त्यस्वरस:।**

यत्र नञोऽसत्त्वे प्रतियोग्यनुयोगिनो: य: सम्बन्ध: भासते तत्रैव नञा तत्सम्बन्धा-वच्छिन्नप्रतियोगिताकस्तदभाव: प्रत्याय्यत इति व्युत्पत्त्यनुसारेण भूतले न घट इत्यादितो भूतलादौ घटाद्यन्योन्याभावबोधं वारयति - **यत्र चे**ति। यादृशप्रतियोग्यनुयोगिवाचकपद-समभिव्याहारस्थल इत्यर्थ:। **विशेषणविशेष्ययो:** - प्रतियोग्यनुयोगिनो:। **अभेदेन** - तादात्म्य-सम्बन्धेन। **अन्वय:** - विशेषणविशष्यभाव:। **तत्र** - तत्रैव। **अन्योन्याभावो नञा बोध्यत** इति। तस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वादिति भाव:। एवञ्च भूतले घट इत्यादौ घटभूतलाद्योस्तादात्म्याप्रतीते: भूतले न घट इत्यादौ न भेदबोध इति सूचितम्। अयं घटो नील इत्यादि: प्रतियोग्यनुयोगिनोरभेदान्वयोदाहरणम्। नायं घटो नील इत्यादिरन्योन्याभाव-बोधोदाहरणम्। भूतले घट इत्यादावेव कथन्न घटभूतलाद्योरभेदबोध इत्यत आह - **तत्रे**ति। नामार्थयोरभेदबोध इत्यर्थ:। समानविभक्तिकताविरहेऽपि स्तोकं पचतीत्यादौ स्तोकपाकाद्योर-भेदबोधात् न स्तोकं पचतीत्यादौ पाकादिक्रियायां स्तोकभेदबोधा**न्नामार्थयोरि**त्युक्तम्। समानविभक्तिकत्वमेकजातीयविभक्त्यन्तत्वम्। एकजातीयत्वञ्च प्रथमात्वद्वितीयात्वाद्यन्य-

तमरूपेण, नत्वानुपूर्व्या। अतो वेदा: प्रमाणमित्यादावप्यभेदान्वयबोध:। नीलघट इत्यादि-समाससाधारण्यायाह - **विरुद्धे**ति। विशेष्यपदे यज्जातीयविभक्तिराहित्यं विशेषणपदेऽपि तज्जातीयविभक्तिराहित्यम्, न तु विशेष्यपदप्रकृतिकविभक्तिविजातीयविभक्तिराहित्यं विशेषणपदे। नीलघटरूपमित्यादितो नीलघटाद्यभेदबोधानुपपत्ते:। घटादिपदानन्तरविभक्तेर-प्रसिद्धे:। विशेष्यपदानन्तरकालीनावृत्तिप्रथमात्वाद्यन्यतमरूपवद्विभक्तिराहित्यं वा विवक्षितम्।

इदन्तु चिन्त्यते - विरुद्धविभक्तिराहित्यं न स्वरूपसदपेक्षितम्। विरुद्धविभक्तिकयोरपि समानविभक्तिकत्वभ्रमेऽभेदबोधात्। समानविभक्तिकयोरपि विरुद्धविभक्तिकत्वभ्रमेऽभेदा-बोधात्। नापि ज्ञातम्। विरुद्धविभक्त्यनुपस्थितिदशायां विरुद्धविभक्तिराहित्याज्ञानेऽपि नीलो घट इत्यादावानुपूर्वीविशेषप्रकारेण भासमाना या स्वादिविभक्ति: विशोष्यविशेषणपदयोस्त-दन्तत्वरूपानुपूर्वीज्ञानात् नील घट इत्यादौ च नीलपदाव्यवहितघटपदत्वादिरूपानुपूर्वीज्ञानात् नीलघटाद्योरभेदान्वयबोधात्। तस्मात् तादृशातादृशानुपूर्वीज्ञानानामननुगतानामपि तदानन्तर्यघटितधर्मावच्छिन्नमभेदान्वयबोधं प्रति हेतुता। दीधितौ वाकारोऽनास्थासूचक इति **युक्तमुत्पशयाम:**।

ननु प्रतियोग्यनुयोगिपदयो: प्रथमान्तत्वमेव नामार्थे नामार्थभेदबोधे तन्त्रं किन्नोच्यते। तावतैव भूतले न घट:, नीले न घट इत्यादौ भेदधीवारणसम्भवादित्यत आह - **अत एवे**ति। प्रतियोग्यनुयोगिपदयो: प्रथमान्तत्वमुपेक्ष्य अभेदान्वयबोधप्रयोजकतत्तत्समभिव्याहारस्यान्यो-न्याभावबोधे तन्त्रतोपगमादित्यर्थ:। **नानुयाजेष्वित्यादावि**ति। प्रतियोग्यनुयोगिवाचकपदयो: प्रथमान्तत्वाभावेऽप्यभेदान्वयप्रयोजकसमानविभक्तिकतामात्रेण नञेति शेष:। यजतिष्वनुयाज-भेदो बोध्यत इत्यनेनाभिसम्बन्ध:। सुबन्तोपि यजतिशब्दो यागरूपधात्वर्थवाचक:। ईक्षतेर्ना-शब्दमित्यादौ तादृशेक्षत्यादिपदमिव ज्ञानादिबोधकम्।

ननु येयजामहमित्यादेरनुषङ्गेण नानुयाजेष्वित्यनेनानुयाजेषु येयजामहन्न करोतीत्येव प्रत्याय्यते। तथा च रात्रौ श्राद्धन्न कुर्वीतेत्यत्र यथा रात्रिश्राद्धकरणे आख्यातार्थेष्टसाधनत्वाभावो नञ्प्रतिपाद्य: तथा प्रकृतेऽपि।

विध्यर्थकतिबर्थस्येष्टसाधनत्वादेरत्यन्ताभाव एव येयजामहादि-मन्त्रपाठकरणे नञ्प्रतिपाद्य:, न तु यजतिष्विनुयाजभेद: इत्याशङ्कान्निराकरोति - **एकवाक्यत्वानुरोधादि**ति। अन्यथा वाक्यभेदेन गौरवादिति भाव:। तदुक्तम् - **सम्भवत्येक-वाक्यत्वे वाक्यभेदो हि नेष्यत** इति। गौरवान्तरमप्याह - **येयजामहमि**ति।

ननु भेदप्रतियोगितयाऽनुयाजान्वये अनुयाजपदोत्तरसप्तम्या वैयर्थ्यप्रसङ्ग:, तया आधारत्वरूपस्वार्थाबोधनादित्यत आह - **विशेषणे**ति। यथाऽनुयाजेषु यजतिष्वित्यादौ तादात्म्यसम्बन्धेन साक्षाद्यजत्यादिविशेषणनुयाजार्थकपदोत्तरविभक्ते: नाधारत्वाद्यर्थपरत्वम्, अपि तु निर्विभक्तिकप्रातिपदिकस्यासाधुतया साधुत्वार्थकतैव। तथा नानुयाजेषु यजतिष्वित्यादावप्यन्तरा भासमाननञर्थद्वारा यजतिविशेषणार्थकानुयाजपदोत्तरविभक्ति: साधुत्वमात्रार्थेत्यर्थ:। न चैवं पदसाधुत्वाय घटो न नील इत्यादौ नीलादिपदोत्तरमिव प्रकृते प्रथमैव स्यात्, न तु सप्तमीति वाच्यम्। भेदेन साक्षाद्विशेष्यविशेषणभावापन्नार्थकयोरिव नञर्थभेदद्वारा विशेष्यविशेषणभावापन्नार्थकयोरपि प्रातिपदिकयो: समानविभक्तिकतानियमेन प्रकृते प्रथमाया अप्रसक्ते:।

ननु घट: कर्मत्वमित्यादौ घटकर्मत्वादीनामाधाराधेयभावादिनाऽनन्वयात् नामार्थे नामार्थस्य विभक्त्यर्थप्रकारेणैव तत्सम्बन्धेन साक्षादन्वय:। विभक्त्यर्थमन्तरा कृत्वैव वाऽन्वय इति व्युत्पत्तिरुपगन्तव्या। तथा च घटो नील:, अनुयाजेषु यजतिष्वित्यादित: प्रतियोग्यनुयोगिनोरभेदान्वयासम्भवात् घटो न नील:, नानुयाजेषु यजतिष्वित्यादौ घटयागादौ नीलानुयाजादिभेदो नञा कथं बोधनीय इत्यत आह - **नामार्थयोरि**ति। **भेदेनान्वयबोध** इति। आधाराधेयभावादिसम्बन्धेनान्वयबोध इत्यर्थ:। **प्रकारीभूतविभक्त्यर्थोपस्थितेरि**ति। विशेषणीभूत-नामार्थे प्रकारतया तादृशसम्बन्धभानप्रयोजिकाया विभक्तिजन्यतदुपस्थितेरित्यर्थ:। एतच्च घटे कर्मत्वमित्यादौ विभक्त्यर्थाधारत्वादिविशेषितस्य घटादेराधेयतादिसम्बन्धेन कर्मत्वादावन्वय इति प्राचीनमतानुसारेणोक्तम्। अन्यथा तादृशबोधाप्रसिद्धेरसङ्गत्यापातात्। नामार्थयोस्सा-क्षाद्भेदान्वयो न भवत्येव। भवति तु विभक्त्यर्थमन्तराकृत्वेति व्युत्पत्ति:। घटे कर्मत्वमित्यादौ घटादिविशेषिताधेयत्वादिरूपविभक्त्यर्थस्यैव कर्मत्वादौ प्रकारतया भानादिति तु तत्त्वम्।

अन्यथा सप्तम्याद्यर्थाधारत्वादिविशेषितप्रकृत्यर्थस्य आधेयत्वादिसम्बन्धेनापरनामार्थेऽन्वये नञ्समभिव्याहारस्थले आधेयत्वादिसम्बन्धावच्छिन्ननामार्थाभावस्यैवापरनामार्थे भानस्यो-पेयतया वृत्त्यनियामकसम्बन्धस्यात्यन्ताभावप्रतियोगितावच्छेदकताविरहेण तदसम्भवाद-सामञ्जस्यमापद्येत।

वस्तुतो नामार्थयोरन्वयबोध इत्यत्र साक्षादन्वयबोधो न विवक्षित:। अपि तु नामार्थप्रकारतानिरूपितनामार्थविशेष्यताकबोध एव। निरूपितत्वञ्च साक्षात्परम्परासाधारणम्। **प्रकारीभूतविभक्त्यर्थोपस्थिते: तन्त्रत्वादि**त्यस्य च विशेष्यीभवन्नामार्थप्रकारतया प्रकारीभवन्ना-मार्थविशेष्यतया अर्थान्तरभासकविभक्तिजन्यतदुपस्थित्यादेस्तन्त्रत्वादित्यर्थ:। नामार्थविशेष्य-काभेदान्यसंसर्गकतत्प्रकारकान्वयबोध एव विभक्तिजन्यतदुपस्थितेः हेतुत्वादिति पर्यवसितार्थ:। ईदृशकारणबाधान्नामार्थे नामार्थस्य साक्षादभेदातिरिक्तसम्बन्धेन प्रकारत्वम्। एवञ्च भेदान्वय एवोक्तव्युत्पत्ते: यजतिष्वनुयाजेष्वित्यादावभेदसम्बन्धेनानुयाजादे: यागादिविशेषणत्वे बाधका-भावान्नानुयाजेषु यजतिष्वित्यादौ यागादावनुयाजादिभेदबोधो निरपवाद एवेति भाव:।

येषां मते नीलं घटमानयेत्यादौ विशेषणविभक्ते: सार्थकत्वाय तस्याभेदार्थकत्वम्, न तु नीलघटाद्योस्तादात्म्यं संसर्ग:, तन्मते नञा नामार्थे नामार्थरूपप्रतियोगिविशेषितभेदो बोधयितुं न शक्यत इति तन्मते न भवत्येव तद्बोध:, अपि तु नामार्थविशेषितविभक्त्यर्थाभेदाभाव एव। नेदं चैत्रस्येत्यादौ चैत्रस्वत्वाद्यभाववन्नञा प्रत्याय्यते। एवञ्च नञो भेदे न शक्त्यन्तरम्, अपि तु अनीलो घट इत्यादावनीलादिपदेन विभक्त्यर्थाभेदविशेषणतयानीलादिभिन्नस्य बोधानुरोधेन भेदवानेव लक्षणया नञर्थ:।

अत्यन्ताभावापेक्षया अन्योन्याभावविशिष्टस्य धर्मिणो गुरुतया विनिगमकसत्त्वेन तत्र शक्त्यसिद्धेरित्याह - **लाघवेने**ति। उक्तकार्यकारणभावे अभेदातिरिक्तसंसर्गकत्वानिवेश-दित्यादि:। **तयो: -** नामार्थयो:। **अन्वयबोधमात्रे** - भेदाभेदसाधारणान्वयबोधसामान्ये। **तथात्वम्** - अन्तराभासमानविभक्त्यर्थोपस्थितेस्तन्त्रत्वम्। तथा च नामार्थयोरभेदेनापि न साक्षादन्वयबोध इति भाव:।

नन्वेवं नीलो घट इत्यादौ नीलघटाद्योरभेदबोधानुपपत्ति: अभेदोपस्थापकविभक्त्य-सत्त्वादित्याशङ्कां निरस्यति - **विशेषणविभक्तिरि**ति। विशेषणपदोत्तरविभक्तिरित्यर्थ:। **अभेदार्थिके**ति। अभेदे प्रथमाविभक्तेरनुशासनविरहान्न तदर्थकत्वसम्भव इति न शङ्क्यम्। विशेषणपदे विशेष्यपदसमानविभक्तिकत्वानुशासनसत्वात्। अन्यथा अभेदसंसर्गतामतेऽपि विशेषणपदोत्तरद्वितीयादे: कर्मत्वाद्यबोधकतया आनुशासनिकत्वानुपपत्ते:। तदनुशासनस्यैव अभेदार्थताग्राहकत्वोपगमात्।

नन्वेवं नीलोत्पलमित्यादिसमासवाक्यात् नीलोत्पलाद्योरभेदबोधो न स्यात् तदर्थकविभक्तिविरहादित्यत आह - **नीलवि**ति। **चित्रगुरि**ति। यद्यपि चित्रगुरित्यादिबहुव्रीहि-समासे गवादिपदमेव चित्रगवादिसम्बन्धिनि लाक्षणिकम्, पूर्वपदं तात्पर्यग्राहकमिति चित्रादिपदोत्तरलुप्तविभक्त्यनुसन्धानमनर्थकम्, तथापि पूर्वपदस्य निरर्थकत्वे समस्यमान-पदयो: सार्थकत्वघटितसामर्थ्यानुपपत्त्या समासानुपपत्ते: उत्तरपदं पूर्वपदार्थाविशेषितस्वार्थ-सम्बन्धिन्येव लाक्षणिकम्। पूर्वपदसमभिव्याहारादेव तदर्थाभेदो लक्ष्यार्थैकदेशभूते उत्तरपदमुख्यार्थे व्युत्पत्तिवैचित्र्यात् भासत इत्याशयेन चित्रगुरित्यादौ चित्रादिपदोत्तर-विभक्त्यनुसन्धानाभिधानम्।

न चारूढवानरो वृक्ष इत्यादिबहुव्रीहौ समस्यमानपदार्थयोरभेदभानेन वानरकर्तृकारोहण-कर्मत्वादिना वृक्षादिभानं वानरादिपदस्य तेन रूपेण लक्षणां विना न निर्वहतीत्यारोहणादिरूप-पूर्वपदार्थघटितोक्तरूपेणोत्तरपदलक्षणाया: आवश्यकत्वात् समस्यमानपदद्वयार्थान्वयस्य समासनियामकत्वानुपपत्तिरिति वाच्यम्। तत्रोक्तलक्ष्यार्थघटकवानरादावप्यारूढादिपदार्थस्या-भेदभानोपगमात्। **अभेदस्याभावो बोध्यतामि**ति। तावतापि यजतिष्वित्यादावेकवाक्यत्वाक्ष-तेरिति भाव:। अभेदाभावस्य नञा बोधने यजतिष्वित्यादौ पर्युदास एव। अभावस्य विधेयतया प्राधान्याभावेन प्रसज्यप्रतिषेधत्वाभावात्।

अप्राधान्यं विधेर्यत्र प्रतिषेधेप्रधानता।

प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्।।

इति प्रसज्यप्रतिषेधलक्षणात्।

अथैव“मयमश्राद्धभोजी”, “असूर्यम्पश्या राजदारा” इत्यादौ नञः समासनिविष्टस्य भिन्नार्थकतया भिन्नाभेदस्यैव विभक्त्यन्तार्थस्य विधेयतया नञर्थाभावस्याप्राधान्येन प्रसज्यप्रतिषेधत्वानुपपत्तिरितिचेत्, भवतु तत्र पर्युदास एव। श्राद्धभोजनसूर्यदर्शनादिरूपक्रिया-कर्तृभिन्नाभेदस्य विधेयत्वे तादृशक्रियाकर्तृभिन्नभेदस्य तादृशक्रियाकर्तृत्वरूपतया “श्राद्धं न भुङ्क्ते”, “सूर्यमपि न पशयन्ती”त्यादिस्थलीयतादृशाक्रियाकर्तृत्वाभावरूपविधेयपर्यवसानेन प्रसज्यप्रतिषेधतुल्यतया च तथाव्यवहारः। अत एव पर्युदासस्थल एव नञ्तत्पुरुषः। अत्र “वादिनामविवाद” इत्यत्राभावस्य प्राधान्येनासमस्त एव नञ्समानार्थोऽशाब्द इति **वदन्ति**। “सूर्यम्पश्य”शब्देन नञ्समासादेव “सूर्यं न पश्यन्ती”त्यर्थपर्यवसानात् सूर्यपदेन नञोऽसमासे चासूर्यपदस्य दृशयुपपदत्वाभावात् **सूर्यललाटयोर्दृशितपोरि**ति खश्प्रत्ययानुशासनविषयत्वम-सूर्यम्पश्या इत्यत्र प्रयत्नेनोपपादनीयम्।

नानुयाजेष्वित्यस्य क्रियाप्रतिषेधपरत्वं बाधकान्तरेण खण्डयतां मतमुपन्यस्यति - **यत्वि**ति। करणनिषेधे नानुयाजेष्वितिनञोऽनुयाजे येयजामहमन्त्रपाठकरणप्रतिषेधपरत्वे विकल्पापत्तेरिति “यजति”पदार्थासङ्कोचेन यजतिष्वित्यादिनाऽनुयाजेऽपि तन्मन्त्रपाठविधानात् विरोधेनैकवाक्यस्याप्रामाण्यापत्तेः अतिरात्रे षोडशिग्रहणाग्रहणयोरिव अनुयाजे तन्मन्त्रपाठतद-भावरूपवैकल्पिकाङ्गद्वयस्य विधायकतया विरोधपरिहारसम्भवेऽपि अनुयाजजन्यपरमापूर्वस्य भावाभावरूपाङ्गद्वयघटितसामग्रीभेदकल्पनेन तत्सामग्रीद्वयप्रयोज्यफलप्रकर्षापकर्षकल्पनेन च गौरवापत्तेरित्यर्थः। विशेषनिषेध इति। तद्धर्मन्यूनवृत्तिधर्मावच्छिन्नविषयकतन्निषेध-वाक्यसत्त्वे तद्विधायकवाक्यस्थतद्धर्मावच्छिन्नार्थकपदस्य निषेधविधिविषयतावच्छेदकविशेष-रूपावच्छिन्नेतरत्वविशिष्टतद्धर्मावच्छिन्नपरताया इत्यर्थः। **ब्राह्मणे**भ्य इति। तत्र ब्राह्मणपदस्य विरोधवारणाय कौण्डिन्येतरब्राह्मणपरत्वादिति भावः। **तत्रापि** - ब्राह्मणेभ्य इत्यादावपि। कौण्डिन्येति। ब्राह्मणान्वयी कौण्डिन्यभेदो न कौण्डिन्यायेत्येतत्प्रतिपाद्य इत्यर्थः। तथा च ब्राह्मणपदस्य न विशेषेतरपरतेत्यर्थः। **विरुद्धैकवचनावरुद्धत्वादि**ति। कौण्डिन्यपदस्यानुयोगि-वाचकब्राह्मणपदोत्तरचतुर्थीबहुवचनविजातीयतदेकवचनान्तत्वादित्यर्थः।

तथा चानुयोगिप्रतियो-गिवाचकपदयोर्विरुद्धवचनराहित्याभावेन नञा तदनुयोगिकतत्प्रतियोगिकभेदबोधो न सम्भवतीति भाव:।

ननु विरुद्धवचनावरुद्धत्वेऽपि विभक्तिविभाजकप्रथमात्वादिना विजातीयविभक्तिरा-हित्यमक्षतमेवेति न ब्राह्मणपदार्थे कौण्डिन्यपदार्थभेदबोधानुपपत्तिरित्यत आह **- न खल्विति। इत्यत्रापि - राजनि महदभेदभेदौ प्रतीयेत** इत्यनेनास्य सम्बन्ध:। **इत्यत्रेवे**ति व्यतिरेकदृष्टान्त:। तथा च यथा "महतो राज्ञ" इत्यत्र राजनि महद्भेद: न महतो राज्ञ इत्यत्र राजनि महद्भेद: प्रतीयते तथा "महतां राज्ञ" इत्यत्र राजनि महद्भेद: न महतां राज्ञ इत्यत्र राजनि महद्भेदो न प्रतीयत इत्यर्थ:। तथा च वचनसाम्यमपि भेदाभेदबोधे अपेक्षितमिति भाव:। **एको न द्वावित्यत्रेवे**ति। यथैको न द्वावित्यत्रानुयोगिप्रतियोगिवाचकैकद्व्यादिपदयोर्विरुद्धवचना-वरुद्धत्वेऽपि समानविभक्तिकतामात्रेण भेदबोध: तथेत्यर्थ:। **कथञ्चित्समर्थनेऽपी**ति। कथञ्चिदुक्तस्थले भेदबोधसमर्थनेऽपीत्यर्थ:। द्विशब्दस्य नित्यद्विवचनान्तता कौण्डिन्यादि-शब्दस्य च न नित्यैकवचनान्तता। एतादृशविशेषसत्त्वेऽप्यनुयोगिप्रतियोगिनोर्विरुद्धसंख्याया अविवक्षास्थल एव विरुद्धवचनावरुद्धत्वं भेदबोधविरोधीत्युपगमेन प्रकृतस्थले विरुद्धसंख्या-विवक्षया एको न द्वावित्येतत्साम्यमित्याशयेन कथञ्चिदित्युक्तम्। कौण्डिन्यस्यानेकत्वेऽपि तद्गतजातावेकत्वविवक्षया परम्परया तद्विशेषणत्वेनैकत्वसंख्याविवक्षासम्भवो बोध्य:। द्वितीयस्य - द्वितीयक्रियापदस्य। **अनन्वयप्रसंगात्** - ब्राह्मणे कौण्डिन्यभेदान्वयपक्षेऽनन्वि-तार्थकत्वप्रसङ्गात्, एकवाक्ये क्रियापदद्वयप्रयोगाभावादिति भाव:। **अत एवे**ति। विशेषनिषेध-स्थले विधिवाक्यस्य सामान्यशब्दस्य विशेषेतरपरताया व्युत्पन्नत्वादेवेत्यर्थ:। **करणनिषेधेऽपी**ति। कुर्वीतेति क्रियावैयर्थ्यप्रसङ्गेना"मावस्यायां पितृभ्यो दद्यादि"त्यादिविधिस्थ-पदबोध्यामावास्यादिकाले "न रात्रावि"त्यनेन रात्रिभेदबोधस्वीकारासम्भवादगत्या वाक्यभेदोपगमेन रात्रौ श्राद्धकरणनिषेधपरत्वेऽपीत्यर्थ:। **न विकल्पावकाश:**। अमावास्यादिरात्रिश्राद्धकरणे विधिनिषेधवाक्ययोर्विरुद्धसफलत्वनिष्फलत्वबोधकत्वेनैकवाक्यस्या-प्रामाण्यप्रसङ्ग:। अमावास्यादिपदार्थे रात्रिभेदस्य न रात्रावित्येतदर्थस्यान्वयेऽप्यमाव-स्यादिपदस्य

रात्रिभिन्नामावास्याद्यर्थकतया रात्रेः श्राद्धकरणविध्यविषयत्वादिति भावः। अमावास्यापदरात्रिपदे नोपाधिविशेषावच्छिन्नमहाकालपरे, महाकालस्यैक्येनामावास्यायां रात्रिभिन्नत्वस्य बाधप्रसङ्गात्। अपि तु कालोपाधिविशेषपरे। कालोपाधीनामप्याधारत्वो-पगमान्नाधारसप्तम्यनुपपत्तिः। "वने सिंहनाद" इतिवदवच्छेदकत्वमेव वा सप्तम्यर्थः। अमावास्यादिरूपकालोपाधयश्च न षष्टिदण्डाद्यवस्थायीन्यखण्डवस्त्वन्तराणि। तथा सत्यमावास्यारात्र्योर्भेदनियमेन तत्र तद्भेदस्याव्यावर्तकताप्रसङ्गात्। किन्तु अमावस्यापदं चरमोत्पन्नकलारम्भकसंयोगनाशानुगुणक्रियाकलापपरम्। परम्परया तत्कलारम्भकद्व्यणुकप-र्यन्तजनकसंयोगानामपि तदारम्भकत्वम्। तादृशक्रियाकलापान्तर्गता एव काश्चित् कलावयवक्रिया रात्रिरूपाः। यतोऽदृश्यदेशविशेषावच्छिन्ना दृश्यदेशविशेषानवच्छिन्ना वा सूर्यक्रिया न रात्रिपदार्थः। अपि तु दृशयदेशवृत्तित्वविशिष्टसूर्यानधिकरणकाल एव। तत्त्वञ्च कलावयवक्रियाविशेषसाधारणम्।

अथामावास्याकालावच्छिन्नस्य अधिकार्यात्मनिष्ठश्राद्धकरणाभावस्य प्रत्यवायजनकत्वे अमावास्यान्तर्गतभागविशेषे श्राद्धकर्तर्यपि तदन्यभागे श्राद्धकरणाभावसत्त्वात्प्रत्यवायप्रसङ्गः। न चैतदतिप्रसङ्गवारणाय तत्र तावत्क्रियास्थायिवस्त्वन्तरमखण्डममावास्यापदार्थः प्रवेश्यः, न तु क्रियाविशेषः। तादृशक्रियारूपामावास्यावच्छिन्नश्राद्धकरणाभावस्योक्तस्थलसाधारण्यात्। यद्यपि दर्शितस्थलेऽप्यवान्तरकालावच्छिन्नाखण्डामावास्याकालस्य कर्तृनिष्ठश्राद्धकरणा-भावस्यावच्छेदकतया तादृशकालावच्छिन्नत्वस्याभावविशेषणत्वेऽप्यतिप्रसङ्गो दुर्वारः, तथापि तादृशामावास्यानिष्ठावच्छेदकतायामनवच्छिन्नत्वनिवेशेनैतन्मते प्रतीकारसम्भव इति वाच्यम्। अमावास्यायां पितृभ्यो दद्यादितिनित्यविधेः प्रत्यवायपरिहाररूपेष्टसाधनताबोधकतया अर्थत एतद्विधिविषयामावास्यापदार्थकाले श्राद्धकरणाभावे प्रत्यवायसाधनत्वबोधात् विधौ अमावास्या-पदस्य क्रियाकलापार्थकत्वम्, प्रत्यवायजनकतावच्छेदकगर्भे अखण्डवस्त्वन्तररूपामावास्या-पदार्थान्तरनिवेशासम्भवादिति चेत्,

सत्यम्। तर्हि अमावास्यायामित्यादिविधौ तावत्कालस्थायिवस्त्वन्तराण्यमावास्यापदार्थः। निषेधविधिस्थरात्रिपदं तादृशामावास्यासाधारणदेशविशेषाच्छिन्नसूर्यक्रियाविशिष्टकालत्वा-

वच्छिन्नपरम्। तद्विशेषणविशिष्टे च काले श्राद्धनिषेधमहिम्ना च तादृशविशेषणविशिष्टवैधर्म्यविशिष्टे अखण्डामावास्यापदार्थे श्राद्धकरणं प्रतीयते। विशिष्टवैधर्म्यं विशिष्टावृत्तिधर्मः। तद्विशेषणवैशिष्ट्यं यत्र धर्मिणि तत्रापि तद्वैशिष्ट्यविरहदशायां तद्विशिष्टावृत्तिधर्मवैशिष्ट्यमक्षतमेव। अत एव "ब्राह्मणाय दीयताम्", "आशौचिने न दातव्यमि"त्यतो भेदस्य व्याप्यवृत्तितानियमेन शुचेरपि कदाचिदशुचितया तत्राशौचविशिष्टभेदासत्त्वेऽपि शौचकाले तस्मै दानं प्रतीयते। भेदस्याव्याप्यवृत्तितामते विशिष्टभेदप्रतीतिरेवोपेयते।

ननु विशेषनिषेधस्थले सामान्यविधिस्थसामान्यशब्दस्य विशेषेतरसामान्यलाक्षणिकत्वाभावेऽपि रात्रौ श्राद्धन्न कुर्वीतेत्यादौ न विकल्पावकाशः। न रात्रावित्यत्र नानुयाजेष्विवितिवन्नञो भेदार्थकतया रात्रिभिन्नकाले कुर्वीतेत्यर्थकत्वेन क्रियानिषेधत्वाभावादित्याशङ्कां निराकरोति - **न ही**ति। **तत्रापि -** न रात्रावित्यत्रापि। **रात्रीतरपरते**ति। नञ्पदस्य रात्रीतरत्वार्थकतेत्यर्थः। न तु निषेधार्थकतेति शेषः। **रात्रिभिन्न** इति। अमावास्यायामित्यादिवत् न रात्रावित्यादेः रात्रिभिन्नकाले पृथक् श्राद्धविधायकत्वेऽप्यमावास्यायामित्यादिविधावमावास्यापदार्थस्यासंकोचेन ततो रात्रिसाधारण्येन श्राद्धकरणलाभादमावास्यादिरात्रौ श्राद्धानुष्ठानप्रसङ्गस्य दुर्वारत्वादित्यर्थः।

इदमुपलक्षणम्। रात्रिभिन्ने कुर्वीतेतिविधिबलात् सर्वतिथिष्वेव श्राद्धानुष्ठानस्य दुर्वारतापि बोध्या। न चायं न श्राद्धान्तरविधिः, अपि तु अमावास्यादिविहितश्राद्धे रात्रिभिन्नकालविधिरेव। अतो नायमतिप्रसङ्ग इति वाच्यम्। अमावास्यायामित्यादित एव काललाभेन कालाकाङ्क्षानिवृत्त्या तत्प्राप्तश्राद्धे कालविधानासम्भवात्। विकल्पेन कालविधाने उक्तातिप्रसङ्गनिवृत्तेः।

ननु श्राद्धनिमित्ततया प्राप्तेऽमावास्यादिकाले भागविशेषाकाङ्क्षायाः श्राद्धप्रयोजकत्वेन रात्रिभिन्नत्वविधिरयमित्यतो नामावास्यादिरात्रौ न वा अमावास्यादिभिन्नदिवसे श्राद्धानुष्ठानप्रसङ्ग इत्याशंक्य अमावास्यायामित्यादिविधिस्थामावास्यादिपदात् प्रतीयमाने अमावास्यादौ रात्रिभेदस्यान्वयं विना न तत्सम्भवः। "न रात्रावि"त्यादिवाक्यस्थस्य कुर्वीतेत्यस्य वैयर्थ्येनामावास्यायां "पितृभ्यो दद्यादि"त्यादिना क्रियान्तरघटितवाक्येन सह

तदेकवाक्यताकल्पनञ्च न युज्यत इति कथं तत्र तस्यान्वय:। तद्वाक्यस्थस्य कुर्वीतेत्यस्य सार्थकतोपगमे च अमावास्यायामित्यादिवाक्यस्थ“दद्यादि”त्यादिक्रियानर्थक्यम्। क्रियारहितञ्चामावास्यादिश्राद्धकालबोधकं वाक्यान्तरं नास्ति यदुपस्थितकाले “न रात्रावि”त्येतदुपस्थितरात्रिभेदान्वयेन “श्राद्धं कुर्वीते”त्येतद्भागबोध्यश्राद्धकरणान्वयेन च सामञ्जस्यं स्यादित्याह - **न खल्वि**ति। **श्राद्धविधायकम् -** श्राद्धकालबोधकम्। **इदम्** - रात्रौ श्राद्धं न कुर्वीतेतिवाक्यम्। **एकवाक्यतामासादयेदि**ति। तादृशक्रियारहितवाक्येन सममस्यैकवाक्यत्वे एतद्वाक्यस्थक्रियाया अन्वयात् तादृशवाक्ये च क्रियाविरहात् क्रियावैयर्थ्यानवकाशादिति भाव:। “न रात्रावि”त्यत्र चेत्क्रियानिर्देशो न स्यात् तदा क्रियाघटितामावास्यादिकालबोधकवाक्येनैकवाक्यतयैव सामञ्जस्यं भवेत्। तदपि नेत्याह - **नापीदमि**ति। **नानुयाजेष्वितिवदि**ति। नानुयाजेष्वितिवाक्यं यथा क्रियान्तररहितमित्यर्थ:।

एतेन क्रियावैयर्थ्याप्रसक्त्या “नानुयाजेषु” “यजतिष्वि”त्यनयोरेकवाक्यतासम्भव इति दर्शितम्। न चात्र क्रियाया असत्त्वेऽप्यमावास्यायामित्यादिना अस्यैकवाक्यत्वे अष्टकादिविध्येकवाक्यत्वासम्भवादष्टकादिश्राद्धस्य रात्रावनुष्ठानप्रसङ्ग इति क्रियाराहित्याभिधानमसङ्गतमिति वाच्यम्। एकपदोपस्थापितस्यानेकवाक्यार्थप्रवेशे बाधकविरहेणामावास्याश्राद्धविधायकवाक्यार्थ इवाष्टकादिविध्यर्थेऽपि “न रात्रावि”त्यर्थरात्रिभेदप्रवेशसम्भवात् अमावास्याष्टकादिबोधकतत्तद्विधिस्थपदानां भवन्मतेऽपि लक्षणोपस्थापितरात्रिभेदविशिष्टतत्तत्पदार्थपरताया आवश्यकत्वात् अस्मन्मतेऽपि “न रात्रावि”त्येतदर्थरात्रिभेदविशिष्टस्वार्थपरत्वकल्पनसम्भवात्।

संसर्गाभावस्य प्रत्यक्ष इव शाब्दबोधेऽपि धर्मिणि प्रतियोगिसंसर्गधी: हेतुरित्यभिमानेन शङ्कते **- अथे**ति। **रात्रौ श्राद्धस्य प्रसक्तावि**ति। अमावास्यायामित्यादिविधावमावास्यादिपदस्य सङ्कोचे निषेधानुपपत्त्या तदसङ्कोचेन विधितो रात्रिश्राद्धकरणे सफलताबोधोपगम इत्यर्थ:। **विकल्पापत्ति: -** विरुद्धार्थकयोर्विधिनिषेधवाक्ययोरेकतराप्रामाण्यप्रसङ्ग:। **अप्रसक्तावि**ति। विकल्पभयेनामावास्यादिपदसङ्कोचेन विधे: रात्रिश्राद्धकरणे सफलताबोधकत्वानुपगम इत्यर्थ:। **कथं निषेध: -** कथ“न्न रात्रावि”तिवाक्याद्रात्रिश्राद्धकरणे निष्फलत्वबोध:। प्रसक्तं हि

प्रतिषिध्यत इति। तद्धर्मिसंसृष्टतया ज्ञातमेव तद्धर्मिनिष्ठाभावप्रतियोगितया ज्ञायत इत्यर्थः। प्रत्यक्ष एव प्रतियोग्यारोपस्य न हेतुत्वम्, कुतः शाब्दबोधे तद्धेतुत्वमित्याशयेन तद्धेतुतावादिनमुपहसति - **साधीयानि**ति। **अयं मन्त्रपाठः -** मन्त्रपाठतुल्यतयाऽभ्युपगतः प्रसक्तं हीत्यादिप्रवादः। **यद्बलात्** - यत्प्रवादबलात्। **वह्निप्रसक्तिरिति।** जलह्रदादावित्यादिः। **उपादीयते** - अपेक्षणीयतयोपेयते।

ननु यत्र निषेधवाक्यं विना क्रियायां प्रवृत्तिः प्रसज्यते तत्रैव तद्वाक्यसार्थक्यं विधिवाक्यस्य प्रवृत्तिफलकत्ववत् निषेधवाक्यस्याप्रवृत्तिफलकत्वात्। एवञ्च विधावमावास्यादिपदस्य रात्रीतरपरत्वे रात्रिश्राद्धस्य विध्यविषयतया तत्राप्रवृत्तिनिर्वाहेन रात्रावितिवाक्यं व्यर्थमेव स्यात्। न च **"नान्तरिक्षेऽग्निश्चेतव्य"** इति वेदः यथा निष्फलः वेद्यामग्निचयनविधानात् अन्तरिक्षेऽग्निचयनेऽविधानादेवाप्रवृत्त्युपपत्तेः तथा "रात्रौ श्राद्धमि"त्यादिरपि निष्फल एव भवत्विति वाच्यम्। सफलत्वे सम्भवति निष्फलत्वानौचित्यात् अगत्या नान्तरिक्ष इत्यादेः तथात्वोपगमात्। प्रकृते तु क्रियापदवैयर्थ्यमुपगम्य विधिस्थामावास्यादिपदेन रात्रावित्यस्यैकवाक्यतया तत्सार्थकतोपपादनस्योचितत्वात्।

एतेन पर्युदासपक्षे नञो भेदरूपमुख्यार्थपरता न सम्भवति नञोऽपि प्रातिपदिकतया "प्रातिपदिकार्थयोर्भेदेन नान्वय" इति व्युत्पत्तौ निपातभेदनिवेशे गौरवेण तद्विरोधात् अमावास्यादिपदार्थे भेदस्यान्वयासम्भवात्। अतो भेदवति लक्षणैवोपगन्तव्या। अयुक्तश्च मुख्यार्थपरित्याग इति प्रकृते निषेधपरतैव नञ इत्यपि **निरस्तम्।** तद्वाक्यसार्थक्यानुरोधेन लक्षणोपगमौचित्यात्। प्रातिपदिकार्थेनेव धात्वर्थेनापि प्रातिपदिकार्थस्य भेदेनानन्वयात्। नञः प्रतिषेधपरत्वपक्षेऽपि "न कुर्वीते"त्यत्र धात्वर्थश्राद्धकरणे नञा इष्टसाधनत्वाभावबोधकत्वा-सम्भवात् अभेदान्वयानुरोधेन तस्याभाववति लक्षणाया आवश्यकत्वाच्च। "प्रसक्तं हि प्रतिषिध्यत" इति प्रवादस्यापि यत्र निषेधं विना तत्क्रियायां प्रवृत्तिप्रसक्तिः तत्रैव निषेधसाफल्यमित्येवार्थः।

यत्तु प्रतिषेधपक्षेऽपि विधिस्थामावास्यादिपदं न रात्रीतरपरं येन निषेधं विनापि रात्रिश्राद्धे प्रवृत्तिप्रसक्तिः न स्यादिति निषेधवैयर्थ्यं स्यात्। न चैवं सति विकल्पोऽपि।

निषेधविरोधेन सामान्यशास्त्रस्य रात्रिश्राद्धांशे सफलत्वसंसर्गबोधानुपगमात्। न च तथा सति कथं प्रवृत्तिप्रसक्तिरिति वाच्यम्। असंसर्गाग्रहप्रवर्तकतामते संसर्गाग्रहेऽपि प्रवृत्तिप्रसक्तेः। न च सामान्यशास्त्रस्य प्रवर्तकासंसर्गाग्रहसहितधर्मधर्मिज्ञानरूपभ्रमजनकत्वे तद्विरोधेन निषेधवाक्येनासंसर्गाग्रहजननासम्भवात् निषेधस्यापि कथं निवर्तकतेति वाच्यम्। निषेधवाक्यस्य सामान्यशास्त्रापेक्षया बलीयसः संसर्गाविषयकत्वरूपभ्रमत्वकल्पकतया प्रवृत्तिविरोधित्वात्। अत एव **"बलीयसा दुर्बलं बाध्यत"** इति न्यायात् रागतः प्रवृत्तिप्रसक्तिविषये अगम्यागमनादौ निषेधवाक्यस्य बलीयसो लौकिकमानबाधकतया निवर्तकत्वमेव, न तु विकल्पः। एवं पशुयागे आघाराज्यभागाङ्गकयागतुल्यताबोधकातिदेश-प्राप्ताघाराज्यभागनिषेधकस्य **"न तौ पशौ करोतीति"** वाक्यस्याघाराज्यभागनिवर्तकत्वेऽपि अतिदेशबाध एव, न तु विकल्पः। षोडशिग्रहणाग्रहणवाक्ययोः तुल्यबलतया बाध्यबाधकभावसम्भवात् विकल्प इति,

तन्न, सामान्यशास्त्रस्यैवोपजीव्यतया बलवत्त्वेन बाधायोगात् विकल्पभयेन पर्युदासपक्षावलम्बनस्य युक्तत्वादित्याशयेनाह - **निषेधे**ति। निषेधबोधकवाक्येत्यर्थः। **तात्पर्यानवबोधेति**, निषेधवाक्यासत्वे विधिवाक्यस्थामावास्यादिपदस्य रात्रीतरामावस्यादिपरत्व-ग्राहकप्रमाणाभावेन रात्रिश्राद्धेपीष्टसाधनतायाः सामान्यपरतया गृहीतामावस्यादिपदघटित-वाक्येन बोधनसम्भवात् रात्रिश्राद्धे प्रवृत्तिप्रसक्त्या तत्प्रवृत्तावङ्गता, "नातिरात्र" इति वाक्यस्य प्रकृते रात्रिश्राद्धकरण इव अतिरात्रे षोडशिग्रहणे इष्टसाधनत्वाभावार्थकत्वे तदभावस्य नातिरात्राङ्गता निर्वहति, ग्रहणविधिना तत्रेष्टसाधनताबोधादेकतराप्रामाण्यञ्च स्यादिति प्रकृताद्विशेषमाह **अत्रचेति।** अत्र - **"नातिरात्र"** इत्यादिवाक्ये, **ग्रहणविधिबोधादिति**। ग्रहणविध्यर्थविरुद्धार्थकताप्रसङ्गादित्यर्थः। तथाच विरुद्धार्थकवाक्यद्वयस्य प्रामाण्यानुपपत्त्या एकवाक्यस्याप्रामाण्यं स्यात्। नच वेदवाक्यमप्रमाणी भवितुमर्हतीतिभावः। **इष्टसाधनमितीति**। अर्थ इत्यनुषज्यते। इष्टञ्चातिरात्रजन्यं परमापूर्वं, न तु तज्जन्यं प्रधानफलं, अङ्गताविरोधात् तदीयप्रधानफलाजनकत्वस्य तदङ्गताघटकत्वादित्यग्रे व्यक्तीभविष्यति। नन्वेवं विधिप्रत्ययार्थेष्टसाधनत्वस्य क्रियानन्वयित्वेन "**प्रकृत्यर्थान्वितेति**" व्युपत्तिविरोध इत्याशंक्य,

नञर्थद्वारा प्रकृत्यर्थान्वयित्वेन न तादृशव्युत्पत्तिभङ्ग इत्याह **व्युत्पन्नश्चेति।** **धात्वर्थस्याभावेपीति।** प्रतियोगितया धात्वर्थान्विते नञर्थाभावेपीत्यर्थ:। **विभक्त्यर्थान्वय:** - तिङर्थस्यान्वय:, **गुरव:** - प्राभाकरा इत्यर्थमाहुरित्यनेनास्य सम्बन्ध:। **कलञ्जभक्षणाभावविषयकं कार्यमितीति।** एतादृशार्थभाने तन्मतसिद्धविध्यर्थकार्यस्य भक्षणान्वितेन नञर्थाभावेन सहान्वायादत एवेत्युपष्टंभसङ्गति:। नञ्समभिव्याहृतविधिप्रत्ययेन क्वचिदभावे आश्रयतासम्बन्धेनेष्टसाधनत्वं प्रत्याय्यते यथा "नातिरात्र" इत्यादौ। क्वचिच्च तत्र प्रतियोगितया तत्प्रत्याय्यते यथा **"रात्रौश्राद्धन्न कुर्वीते"**त्यादौ, इत्यत्र किन्नियामक मित्याकाङ्क्षायामाह **नियमस्त्विति।** तात्पर्य्यादीत्यादिना योग्यतापरिग्रह:। **"रात्रौश्राद्धन्न कुर्वीते"**त्यत्र रात्रिश्राद्धकरणाभावस्य फलजनकत्वाभाव एव तात्पर्यं कल्प्यते। **"नातिरात्र"** इत्यादावतिरात्रे षोडशिग्रहणस्येष्टसाधनतायाः ग्रहणविधिना बोधनात्तत्र तदभावबाधेन तद भावस्येष्टसाधनत्वे एव तात्पर्यमितिभाव:।

नन्वङ्गविधिभि: कथमिष्टसाधनत्वं बोधनीयम्। **फलवत्सन्निधावफलमङ्गमि**त्यङ्ग-लक्षणेन अङ्गानान्निष्फलत्वावगमादित्याशङ्काम् अङ्गलक्षणे फलसामान्याभावरूपाफलत्व-निवेशाभिमानविजृम्भितां निराकुरुते **मुख्येति।** अङ्गलक्षणेऽफलपदस्य मुख्यफलाजनकार्थकतया तादृशफलत्वसत्वेपि परमापूर्वरूपफलजनकत्वबोधनाविरोधादित्यर्थ:। **अन्यथाऽङ्गेप्रवृत्त्यनुपपत्ते-रिति।** अत एव यागे रागादङ्गे वैधीति प्रवादोपीतिभाव:। इष्टप्रयोजकत्वरूपेष्टसाधनत्वस्य विध्यर्थत्वे प्रधानफलरूपेष्टसाधनताबोधनमप्यविरुद्धमिति बोध्यम्।

ननु षोडशिग्रहणं विनापि तदभावाङ्गकातिरात्रात् परमापूर्वसम्भवे षोडशिग्रहणे परमापूर्वरूपेष्टसाधनताबोधेपि प्रवृत्यनुपपत्ति: तज्जन्यश्रमादौ बलवद्द्वेषसम्भवादित्याशङ्कां फलभ्रममनभ्युपेत्य समाधत्ते। **ग्रहणविध्यन्यथानुपपत्त्येति।** ग्रहणविधे: प्रवृत्तिपरत्वान्य-थानुपपत्त्येत्यर्थ:। **अतिशयितं -** अतिशयरूपजातिविशेषवत्। प्रधानफलातिशयविरहे स्वतोऽसुन्दरे परमापूर्वे अतिशयरूपजातिविशेषस्वीकारेपि तत्रोत्कटरागासम्भवेन षोडशिग्रहणजन्यश्रमादौ बलवद्द्वेष इत्यत: प्रधानफलप्रकर्षस्यापि कल्पनामाह **तस्माच्चेति।** अतिशयितपरमापूर्वाच्चेत्यर्थः। **फलम् -** अतिरात्रप्रधानफलं, **कल्प्यतइति।** तथाच तादृशफले

उत्कटरागतज्जनकातिशयितापूर्वेप्युत्कटरागोदयेन षोडशिग्रहणजन्यश्रमादौ बलवद्द्वेषतिरस्कारेण तत्र प्रवृत्तिनिर्वाह इति भाव:।

अत्र च वाकारासत्वेपि विकल्पनिर्वाह:। तथाहि ययो: कल्पयोरन्योन्यजन्यफलविरोधिता तयोरेव विरुद्धकल्परूपविकल्पता। व्रीहियवाद्योस्समुच्चितयोरपि फलजनकत्वसम्भवेन तत्र तन्निराकरणाय तयो: फलजनने परस्पराभावसहकारिताप्रमाणमावश्यकम्, तच्च वाकारं विना न सम्भवतीति वाकारापेक्षा। अतो यत्र **'यवैर्यजेते'**त्यादौ वाकारो न श्रूयते तत्रापि स कल्प्यते। अत्र च कल्पयोर्भावाभावरूपतया विरोधेन मिलनासम्भवादेकस्यापरकारणप्रतिक्षेपकतया अन्योन्यफलविरोधिताया अर्थतो लाभान्न वाकारापेक्षा।

अथ व्रीहियवविकल्पस्थले वाकारेण यागरूपकार्य्ये व्रीहियवयो: परस्पराभावसाहित्येन कारणताप्रत्यायनासम्भव:। एकस्यापि यागस्य देवतोद्देश्यकत्यागरूपस्य त्यागविषयपुरोडाश-रूपद्रव्यनिष्पत्तिद्वारा व्रीहियवोभयसाध्यतासम्भवात्। न च स्वर्गं प्रति व्रीहियागयवयागयो: परस्पराभावसाहित्येन कारणता वाकारवशात् प्रतीयत इत्यपि सम्यक्। तथासति व्रीहियागयवयागयोरेव विरुद्धकल्पद्वयरूपतया क्रमेण यागद्वयकर्त्तु: स्वर्गानुत्पादप्रसङ्गात्। **'यवैर्य्यजेते'**त्यस्य प्राप्तयागकरणीभूतव्रीहिरूपद्रव्यलाभेन द्रव्याकाङ्क्षानिवृत्तावपि विकल्पमुख्य-द्रव्याकाङ्क्षया यवरूपद्रव्यविधायकतायाः मीमांसकसिद्धान्तसिद्धायाः भङ्गप्रसङ्गाच्च।

एतेन गुरुमते प्रधानविधेरपि यागजन्यत्वेन अपूर्वबोधकतया अपूर्वं प्रत्येव व्रीहियवयागयो: परस्पराभावसाहित्येन कारणता वाकारसमभिव्याहारवशात् प्रतीयते। एकेन चैकदा यागद्वयानुष्ठानासम्भव:। क्रमेण यागाद्वयानुष्ठानस्थले चैकदा तयोरसत्वेन क्रमेणापूर्वद्वयोत्पत्तौ बाधकाभाव:। अपूर्वे यागस्य साक्षात्कारणतावत् साक्षादेव प्रतिबन्धकत्वादित्यपि निरस्तम्। विधिप्रत्ययस्यापूर्ववाचकत्ववादिनैयायिकमतेऽपूर्वयागयोर्वै-कल्पिककारणतायाः विधिवाक्यतोऽप्रतीतेश्च। एवं वाकारेण करणयोर्व्रीहियवयो: परस्परासमवहितत्वमात्रं प्रत्यय्याते। दण्डाच्चक्राद्वा घट इत्याद्यप्रयोगात्। व्रीह्यसमवहित-यवस्य करणत्वलाभादेव च व्रीह्यसमवधाने कथं याग इत्याकारायाः यवविध्युत्थापका-काङ्क्षाया: शान्ति:, न तु परस्पराभावसहकृतत्वं वार्थ:। तृणादरणेर्वा वह्निर्जायते इत्यादि

प्रयोगसत्वात्। नहि तृणादिभि: परस्पराभावसहकारेणवह्न्यादि कार्यं जन्यते मिलितादपि तादृशकार्योत्पत्ते:। तथा च कथं व्रीहियवयोर्मिलितयोरशास्त्रार्थतेतिचेत्।

सत्यं व्रीहिभिर्यवैर्वा यजेतेत्यतो व्रीहिकरणकत्वयवकरणकत्वयोर्यागविशेषणयोर्याग-निष्ठेष्टसाधनतावच्छेदकत्वं प्रतियते। एकविशिष्टेऽपरवैशिष्ट्यबोधकशब्दस्य धर्मिविशेषणे विशेषणान्तरावच्छेदकत्वबोधकताया अपि व्युत्पत्तिसिद्धत्वात्। औत्सर्गिके विशिष्टान्वये सम्भवति चोपलक्षितान्वये तात्पर्याकल्पनात्। एवञ्च व्रीहिकरणकत्वयवकरणकत्वयो: कल्पयोः यागनिष्ठस्वर्गोत्पादकतावच्छेदकत्वरूपस्वर्गप्रयोजकत्वे न विधायकं तादृशवाक्यद्वयं, तयोस्तत्प्रयोजकत्वञ्च न मिलितयो:, एककरणकत्वान्वयितया भासमाने यागेऽन्यकरणकत्वाभावस्य वाकारेण द्योतनात्। तस्यापि स्वर्गसाधनत्वान्वयियागविशेषणतया तुल्यन्यायेन एककरणकत्वप्रयोज्यस्वर्गेऽपरकरणकत्वाभावस्य प्रयोजकत्वलाभात्। अत: कल्पयोर्विरोधेन विकल्पता वाकारकल्पना बींजञ्च।

व्रीह्यकरकणक: स्वर्गसाधनव्रीहियागजातीययाग: किं द्रव्यकरणक इत्येतादृशी विकल्पमुख्याकाङ्क्षा। व्रीह्यकरणकत्वविशिष्टे करणान्तराकाङ्क्षायास्तद्विशिष्टे करणान्तरलाभेनैव निवृत्ते:, तद्विशिष्टे करणान्तरबोधस्य तद्बोधकवाकारमन्तरेणानुपपत्तेः। तृणादरर्णेर्वा वह्नि: पाकहेतुरित्यादौ प्रमाणवाक्ये चैककारणसाध्यत्वान्वयिनि वाकारेणापरसाध्यत्वाभावबोधनेपि तदभावस्यागत्या उपलक्षणतयैव भाने तात्पर्यमुपेयते नतु विशेषणतया तद्भाने। मिलिताभ्यामपि तत्तत्कारणाभ्यां जनितेन वह्न्यादिना पाकादिकार्य्यजननस्य प्रामाणिकतयैकसाध्यकार्य्येऽपरसाध्यत्वाभावप्रयोज्यताबोधात्।

अथ 'इडो यजति' 'समिधो यजती'त्यादि विधिबोधितानामङ्गानां कथन्न विकल्पता, तत्रापि प्रथमाङ्गविधितोऽङ्गाकाङ्क्षानिवृत्या यवविधिवद्विकल्पमुख्याकाङ्क्षयैव विध्यन्तर-प्रवृत्ते: विध्यन्तरकल्पनाया आवश्यकत्वात्। तद्बलाच्चैकाङ्गसमवधानाभावरूपवाकारार्थ-विशिष्टस्यैवापराङ्गस्य परमापूर्वसाधनतावगमाद् विशेषणीभूतस्याभावस्य - फलप्रयोजकताया आवश्यकत्वादितिचेन्न। अङ्गानां यत्र क्रम: श्रुतस्तत्राङ्गविकल्पासम्भवेन समुच्चितानामनेकेषामङ्गत्वदर्शानादेकाङ्गलाभेपि किमन्यदङ्गमित्यङ्गान्तराकाङ्क्षयैव द्विती-

यादिविधीनां प्रवृत्तिसम्भवेन विकल्पमुख्याकाङ्क्षायास्तदुत्थापकत्वानुपगमात्। तथासति परस्पराभावसापेक्षताकल्पनेन गौरवात्।

नचैव'**मग्रभागन्ततस्तेभ्यो दद्यान्मूल्यञ्च जीवता'**मिति विधिबोधितयो: परभूम्याधिकरणकश्राद्धाङ्गयोरग्रभागदानमूल्यदानयोर्विकल्पो न स्यात्, विकल्पमुखीमाकाङ्क्षा-मन्तरेणैवोक्ताकाङक्षया मूल्यदानविधिसम्भवादिति वाच्यम्। तयो: **"तद्भूमिस्वामिनः तस्य हरन्ति पितरो बलादि"** त्यर्थवादबोधितहरणनिवृत्तिद्वारा श्राद्धाङ्गत्वादग्रभागदानमात्रेण हरणनिवृत्तिसम्भवात्, हरणनिवर्तकतया तल्लाभे हरणनिवर्तकान्तराकाङक्षाया अनुदयेन विकल्पमुख्यैवाकाङ्क्षया मूल्यदानविधिप्रवृत्ते: चकारस्य विकल्पार्थकताया आवश्यकत्वात्। न च तथापि तत्र विकल्पानुपपत्ति:। यतोऽग्रदानमूल्यदानयो: क्रमेण विधानोपगम एव प्रथमविधितोऽग्रदानस्य हरणनिवर्तकत्वलाभेन तन्निवर्तकाकाङक्षापूरणाद् विकल्प: सम्भवेत्। तदेवनोपेयते युगपत्समुच्चितोभयदाने बाधकाभावादिति वाच्यम्। अग्रदानमूल्यदानयो: सम्प्रदानप्रतिनियमेनाग्रादानत्वमूल्यदानत्वावच्छिन्नयो: पृथक् सम्प्रदानद्वयानुरोधाद् वाक्य-भेदस्यावश्यकतया युगपदुभयविधानासम्भवात्।

अथैवं यत्र धवछिदात्वरवदिरछिदात्वावच्छिन्नयो: पृथक् दात्रकुठाराधिकरणकत्वान्वये तात्पर्यं तत्र वाक्यभेदेन सामर्थ्यविरहाद् **"धवखदिरौ दात्रकुठाराभ्यां छिनत्तीति"** प्रयोगानुपपत्ति: समासासम्भवादिति चेन्न भवत्येव तथातात्पर्येण तादृशप्रयोग:। यत्र छिदात्वरूपैकधर्मावच्छिन्नायामेव विभिन्नव्यक्तौ युगपद् धवकर्मकत्वदात्रकरणकत्वयो: खदिरकर्मकत्वकुठारकरणकत्वयोरन्वये तात्पर्यं तत्रैव तथाप्रयोग:। प्रकृते च भूस्वामिपित्राद्युद्देश्यकत्वविशेष्यतावच्छेदकतापन्नाग्राभागदानत्वादिना प्रवृत्तिनिर्वाहायाग्रभाग-दानत्वादिरूपविभिन्नधर्मावच्छिन्ने पृथक् सम्प्रदानान्वयस्यावश्यकतेत्यलमप्रकृताधिकविचारेण।

भूतले न घट: भूतलन्न घट इत्यादौ प्रतियोग्यभावयो: प्रतियोग्यनुयोगिभावस्य भूतलन्न घट: न पचति चैत्रः इत्यादावभावाधारयोराधाराधेयभावस्य च संसर्गतया भानं नञ: प्रातिपदिकत्वेपि प्रातिपदिकार्थकयोः न भेदेन साक्षादन्वयः इति व्युत्पत्तौ निपातातिरि-क्तत्वस्य

प्रातिपादिकविशेषणतया नानुपपन्नमित्याह **प्रतियोग्यभावयोरिति।** तद्विशेषणप्रवेश: प्रयोजनान्तरानुरोधेनाप्यावश्यक इत्यत आह **तत्र वेति**। यतो निपातार्थस्य प्रातिपदिकान्तरार्थेन साक्षाद्भेदान्वयो नानुपपन्न: अत एवेत्यर्थ:। **इवाद्यर्थान्वय** इति। **"चन्द्र इव मुखमि"**त्यादाविवार्थसादृश्ये प्रतियोग्यनुयोगिनोश्चन्द्रमुखयो: प्रतियोगित्वानुयोगित्वभान इत्यर्थ:। **न षष्ठ्याद्यपेक्षेति।** प्रतियोगिपदोत्तरं षष्ठ्या: अनुयोगिपदोत्तरं सप्तम्याश्च नापेक्षेत्यर्थ:। तयो: सादृश्यरूपनामार्थेन साक्षादनन्वये प्रतियोगित्वादे: प्रकारताया उपगन्तव्यतया तदुपस्थापकषष्ठ्यादिविभक्त्यपेक्षा स्यादिति भाव:।

नन्वेवमघटं भूतलमित्यादिबहुव्रीहौ असमो देश इत्यादि नञ्तत्पुरुषे च मुख्ययोर्नञर्थयोरत्यन्तान्योन्याभावयोरेवाधारतासम्बन्धेन भूतलदेशादावन्वयसम्भवेन तत्रात्य-न्तान्योन्याभाववतो धर्मिणः नञो लक्षणा सर्वसिद्धा नोचितेत्यत आह **अघट**मिति। **सामानाधिकरण्यानुरोधादिति**। एकधर्मिबोधकत्वानुरोधादित्यर्थ:। अन्यथा समानलिङ्गवचनत्वा-द्यनुपपत्तेरित्यर्थ:। अत्र प्रथमे धर्मणि लक्षणां विनाऽन्यपदार्थाबोधकत्वेन बहुव्रीह्यनुपपत्ति: अभावार्थकत्वेचाव्ययीभावापत्तिश्च द्रष्टव्या।

उक्तव्युत्पत्तौ निपातातिरिक्तत्वविशेषणमप्रक्षिप्यैव षष्ठ्यादिविभक्तिमन्तरेणैव प्रतियोग्यनुयोगिभावादिभानमुपपादयतामतमुपन्यस्यति **केचित्विति। सुप** इति। घटो नास्तीत्यादौ प्रथमाविभक्तेः नानुयाजेष्वित्यादौ सप्तम्यादिविभक्तेरित्यर्थ:। **प्रतियोगित्व** इति। आधेयतासम्बन्धेन विशेषणीभवत: प्रकृत्यर्थस्य विशेष्यतया निरूपकतासम्बन्धेन चाभावविशेषणतया भासमान इत्यादि:। एतच्च स्वामित्वादे: पष्ठ्यर्थतावादिप्राचीनमतानुसारेण। सर्वत्र सप्तम्यन्तेऽग्रिमस्य लक्षणेत्यस्य सम्बन्ध:। स्वमतानुसारेणाह **अनुयोगित्वं वेति।** निरुप्यत्वसम्बन्धेन विशेषणीभवत: प्रकृत्यर्थस्य विशेष्यतया आश्रयतासम्बन्धेन चाभावविशेषणतया भासमान इत्यादि:।

यथा स्वामित्वादे: षष्ठ्यर्थतामते नेदं चैत्रस्येत्यादौ निरूपकता सम्बन्धावच्छिन्नाभावबोधस्यैवोपेयतया तादृशसम्बन्धस्य चाभावप्रतियोगितानवच्छेदकत-याऽसामञ्जस्यं तथाऽत्र घटो नेत्यादौ प्रतियोगित्वस्य सुबर्थतामते न काचिदनुपत्ति:।

नञर्थाभावानुयोगिकप्रतियोगिवाचकपदोत्तरविभक्त्यर्थाभावस्य नञाऽबोधनात् नेदं चैत्रस्येति-वत्तादृशाभावतात्पर्येण घटो नेत्यप्रयोगात्। अत्र प्रथममतेऽस्वरसो नास्ति। परन्त्वनुयोगित्व-स्याप्युक्तस्थले सुबर्थता सम्भवतीति तस्य सुबर्थताकल्पाश्रयणम्। एतावता नञर्थे प्रतियोगिनः साक्षाद् विशेषणत्वन्निराकृत्य भूतलन्न घटः न पचति चैत्र इत्यादौ नञर्थस्यानुयोगिनि भेदेन साक्षात्तथात्वं निराकरोति **नञुत्तरस्य चेति**। **सुप** इत्यनुषज्यते। निपातोत्तरविभक्ते-र्न्निरर्थकतामतानुसारेणाह **नञो वेति**। **अभाववतिलक्षणेति।** तथाच नञर्थेनानुयोगिनोऽभेदान्वय इति भावः।

न च निपातोत्तरं प्रथमाविभक्तेरेव सर्वत्रोपगमात् भूतलन्न घट इत्यादौ भूतलादिपदनञ्पदयोः समानविभक्तिकत्वेपि **"नानुयाजेषु यजतिष्वि"**त्यादौ नञः सप्तम्यन्तता विरहेण यजत्यादिपदसमानविभक्तिकताविरहात् तदर्थस्याभाववतो यजत्यादावभेदान्वया-सम्भव इति वाच्यम्। निपातोत्तरं सर्वविभक्त्युत्पादोपगमात्। अत एव पृथिव्यामेव गन्ध इत्यादावेवकारोत्तरसप्तम्यर्थव्यवच्छेदबोधो दीधितिकृतैरभिहितः। **न पचति, इदं न राज्ञ** इत्यत्र प्रतियोग्यनुयोगिभावसंसर्गेण विभक्त्यर्थविशेषितभेदबोधः कथन्न जायते, कथम्वा भूतलन्न घट इत्यादौ न भूतलादौ घटादिसंसर्गाभावबोधः? नञर्थसंसर्गाभावे घटादिपदोत्तरप्रथमया घटादिप्रतियोगिकत्वस्य नञ्पदोत्तरप्रथमया चाभावाधारत्वस्य भूतलादौ बोधनसम्भवादित्यत आह **विभक्त्यर्थेति।** विभक्त्यर्थान्योन्याभावस्य समानविभक्तिकपदार्थयोः संसर्गाभावस्य च बोधने नञोऽसामर्थ्यमित्यर्थः। असामर्थ्यञ्च तादृशप्रतियोग्यनुयोगिवाचकपदाभ्यां नञ्पदसमभिव्याहारज्ञानस्य तादृशफलानुत्पादकतया तत्र तत्कारणत्वानुपगमादितिभावः। आहुरित्यस्वरससूचनाय। स च प्रथमाविभक्त्या संख्याद्यतिरिक्तार्थबोधने तस्या असाधुतापत्तिरिति। **इति महामहोपाध्याय गदाधरभट्टाचार्यकृतनञ्वादटीका समाप्ता।।**

संसर्गाभावोऽन्योन्याभावश्च नञोर्थः। तत्र चान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं, **नीलघटवति न घटः, नीलो घटो न घट** इत्याद्यव्यवहाराद् **पीतघटवति न नीलो घटः, पीतो घटो न नीलघट** इत्यादिव्यवहाराच्च। प्रतियोग्यभावान्वयौ तुल्ययोगयक्षेमौ। तेन यत्पदोपस्थाप्यस्य प्रतियोगिन अनुयोगिन्याधाराधेयभावसम्बन्धेनान्वयबोधः। तत्र

तत्संसर्गाभावस्यापि तथा। यथा **पचति चैत्रो, न पचति चैत्र:, चैत्रस्येदं, न चैत्रस्येत्यादि।** तिङर्थस्य कृत्यादे: प्रथमान्तपदोपस्थापित एव तत्र तथेति तदभावस्यापि तथा। षष्ठ्यादे: चैत्रादिनिरूपितं स्वत्वादिकमर्थ:। न तु तन्निष्ठस्वाम्यादि, तस्य धनाद्यवृत्तित्वेन चैत्रीये धने नेदं चैत्रस्येति प्रसङ्गात्। निरूपकत्वादेश्च संसर्गस्य प्रतियोगितानवच्छेदकत्वादित्येषादिक्।

यत्र चाधाराधेयभावो न संसर्गमर्यादया लभ्यस्तत्रानुयोगिपदे सप्तम्यपेक्षा। यथा **भूतले घट: भूतले न घट** इति। सप्तम्यर्थान्विताभावस्य विशेषणतया प्रतियोग्यन्वय इति **कश्चित्।** अत्र च तात्पर्यवशात्कदाचित्भूतलादौ घटाद्यभाव: कदाचिच्च घटादौ भूतलवृत्तित्वाभाव: प्रतीयते। अत एव पृथिव्यां गन्धो न जल इत्यादौ प्रतीतेरेकविशेष्यकत्वानुभव:।

केचित्तु सर्वत्र विशेष्ये विशेषणस्याभावो नञा प्रत्याय्यते। अत एव भूतले घटौ न स्त: घटा न सन्तीत्यादौ भूतले घटोऽस्तीत्यादाविव वचनैक्यनियम इति प्राहु:। तेषां जातौ न सत्तेत्यत्र गतिश्चिन्तनीया। जातिसमवेतत्वस्याप्रसिद्धत्वात्। सम्बन्धान्तरेण जातिवृत्तित्वस्य च सत्तायां सत्वात्।

यत्र विशेषणविशेष्ययोरभेदान्वयो व्युत्पन्नस्तत्रान्योन्याभावो नञा बोध्यते। यथाऽयं **घटो नीलो, नायं घटो नील** इति। तत्र च विशेषणविशेष्यपदयो: समानविभक्तिकत्वं विरुद्धविभक्तिकत्वविरहो वा तन्त्रम्। अत एव **"यजतिषु ये यजामहङ्करोति, नानुयाजेष्वि"**त्यादावेकवाक्यत्वानुरोधात् येयजामहमित्याद्यनुषङ्गे गौरवाच्च यजतिष्वनुयाज-भेदो बोध्यते, विशेषणविभक्तिस्तु प्रयोगसाधुत्वार्थिका। नामार्थयोर्भेदेनान्वयबोधे एव प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वात्। लाघवेनान्वयबोधमात्र एव तथात्वम्। विशेषण-विभक्तिस्त्वभेदार्थिका नीलोत्पलं चित्रगुरित्यादौ लुप्तविभक्तेरनुसन्धानम् इति मते तु न राज्ञः इत्यत्र षष्ठ्यर्थस्य सम्बन्धस्येवात्रापि सप्तम्यर्थाभेदस्याभावो बोध्यते।

यत्तु करणनिषेधे विकल्पापत्तेर्भेदपरतेति तन्न। विशेषनिषेधे सामान्यविधेस्तदि-तरपरतायाः "**ब्राह्मण्येभ्यो दधि दातव्यं कौडिन्याय न दातव्यमित्**"यादौ व्युत्पत्तिसिद्धत्वेन विकल्पानवकाशात्। न च तत्रापि कौण्डिन्यभेदो बोध्य:। कौण्डिन्यपदस्य विरुद्धैकवचनाव-रुद्धत्वात्। न खलु महतो राज्ञो, न महतो राज्ञः इत्यत्रेव महतां राज्ञः इत्यत्रापि राजनि

महदभेदभेदौ प्रतीयेते। एको न द्वावित्यादिवत्कथञ्चित्समर्थनेपि द्वितीयस्य दातव्यमित्य-स्यानन्वयप्रसङ्गाच्च।

अत एव **"रात्रौ श्रद्धं न कुर्वीतेत्या"**दौ करणनिषेधेपि विकल्पानवकाश:। न हि तत्रापि रात्रीतरपरता। रात्रिभिन्ने श्राद्धविधावप्य"मावास्यायां पितृभ्यो दद्यादित्या"दितो रात्रिश्राद्धप्रसक्तेर्दुर्वारत्वात्। न खलु क्रियारहितमपि श्राद्धविधायकं वाक्यान्तरमस्ति। येनेदं तेन सहैकवाक्यतामासादयेत् नापीदं नानुयाजेष्वितिवत्पृथक्क्रियारहितम्।

अथ रात्रौ श्राद्धस्य प्रसक्तौ विकल्पापत्तिरप्राप्तौ निषेधानुपपत्ति:। प्रसक्तं हि प्रतिषिध्यते इतिचेन्न। साधीयानयं मन्त्रपाठो यद्बलाज्जलह्रदे वह्निर्नास्तीत्यादौ शाब्दबोधेपि परमप्रयत्नेन तत्र वह्निप्रसक्तिरुपादीयते। निषेधविधिवैयर्थ्यमितिचेत् तात्पर्यानवबोध-निबन्धनरात्रिश्राद्धकरणवारणस्य तदर्थत्वात्। एकविषयतया पुनरनन्यगतिकतया षोडशिग्रहणा-ग्रहणयोर्विकल्प इति। अत्र च षोडशिग्रहणं नेष्टसाधानमित्यादिकन्नार्थः ग्रहणविधिविरोधात्। अपितु षोडशिग्रहणाभाव इष्टसाधनमित्यादिकम्। व्युत्पन्नश्च नञ्समभिव्याहृतधात्वर्थ-स्याभावेपि विभक्त्यर्थान्वय:।

अत एव प्राभाकरा: **"न कलञ्जं भक्षयेदि"**ति श्रुते: कलञ्जभक्षणाभावविषयकं कार्यमर्थमाहु:। नियमस्तु तात्पर्यवशान्मुख्यफलाजनकत्वेऽपि चाङ्गस्य पस्मापूर्वरूपेष्ट-साधनत्वमविरुद्धम्, विशणविध्यर्थानुपपत्त्या च षोडशिप्रहणादतिशयितं परमापूर्व तस्माञ्चातिशयितं मुख्यफलमपि कल्प्यत इति सर्व समञ्जसम्।

प्रतियोग्यमात्रयोः प्रतियोग्यनुयोगिभावोऽभावोविकरणयोः आधाराधेयभावश्च संबन्ध-विधया भासते, निपातातिरिक्तस्थल एव प्रातिपदिकार्थयोर्भेदेनान्वये प्रकारीभूतविभक्त्यर्थोप-स्थितेस्तन्त्रत्वात्, अत एवेवर्थान्वये न षष्ठ्याद्यपेक्षा। अघटं भूतलमसमो देशः इत्यादौ समासे सामानाधिकरण्यानुरोधान्नञोऽभाववत्परता।

केचित्तु प्रतियोगिपदोत्तरस्य सुप: प्रतियोगित्वे अनुयोगित्वे वा, नञुत्तरस्याधिकरणत्वे नञोवाऽभाववति लक्षणा। विभक्त्यर्थानुयोगिसमानविभक्तिकार्थयोरन्योन्याभावसंसर्गाभावबोधने

नञोऽसामर्थ्यम्। तेन न पचति न राज्ञ इत्यादौ कृत्यादेरन्योन्याभावो भूतलन्न घट इत्यादौ घटादेस्संर्गाभावो न प्रतीयत इत्याहुः।

इति महामहोपाध्यायरघुलनाथशिरोमणिभट्टाचार्यकृतनञ्वादः समाप्तः।।

****